श्रीगणेशाय नमः ॥ वह्निव्याप्यधूमवान् पर्वत इत्यादिपरामर्शाद्वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्याद्यनुमि
तिमामनन्त्याचार्याः तेषामयमाशयः तथाविधपरामर्शात्तादृशानुमित्यनङ्गीकारे वह्निव्याप्यालोकवानय
र्वत इत्यादिपरामर्शादपि पर्वतो वह्निमानित्यनुमित्यापत्त्या पर्वतोद्देश्यकवह्निविधेयकानुमितिं प्रति वह्निव्या
प्यधूमप्रकारकपर्वतविशेष्यकपरामर्शस्य हेतुतायां व्यभिचारात् तद्वारणार्थं धूमपरामर्शजन्यतावच्छेदकको
टौ स्वाव्यवहितोत्तरत्वगोस्मन्निकत्वादिसंबंधेन धूमपरामर्शवत्त्वनिवेशनमावश्यकं चिन्तामणिकारमते । आ
चार्यमते तादृशपरामर्शात्तथाविधानुमित्यनभ्युपगमेन वह्निव्याप्यधूमप्रकारकपर्वतोद्देश्यकवह्निविधेय
कानुमितिं प्रति वह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकपरामर्शत्वेन हेतुतायाः कल्पनीयतया वह्निव्या
प्यालोकवान्पर्वत इत्यादिपरामर्शात्तथाविधानुमित्युत्पत्त्यभावेन धूमपरामर्शहेतुतायां व्यभिचाराभावा
द्धूमपरामर्शजन्यतावच्छेदककोटौ अव्यवहितोत्तरत्वादिनिवेशप्रयोजनाभावात् तन्निवेशप्रयुक्तला

यंवाचिंतामणिकारमतापेक्षयागुरुत्वपरिहारमेव॥ अथाचार्यमतेवह्निव्याप्यधूमवान्पर्वतइतिपरामर्शस्यकिं
कार्यतावच्छेदकंतावद्वह्निव्याप्यधूमप्रकारकपर्वतोद्देश्यकवह्निविधेयकानुमितित्वं॥ वह्निव्याप्यधूमवन्म
हानसंवह्निव्याप्यालोकवांश्चपर्वतइत्यादिसमूहालंबनजन्यवह्निव्याप्यधूमवन्महानसंवह्निमत्वह्नि
व्याप्यालोकवान्पर्वतोवह्निमांश्चेतिसमूहालंबनानुमितौव्यभिचारात्।नचतत्रवह्निव्याप्यधूमप्रकार
कपर्वतविशेष्यकनिश्चयरूपकारणाभावात्तत्रकथंव्यभिचारावकाशइतिवाच्यं॥ उपदर्शितानुमिति
त्वावच्छिन्नंप्रतिवह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकनिश्चयत्वेनहेतुत्वेवह्निव्याप्यधूमवन्महानसंपर्व
तोघटवांश्चेतिसमूहालंबनादपिवह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमित्युत्पत्तेस्तथाविधानुमितिंप्र
तिवह्निव्याप्यधूमप्रकारतानिरूपितपर्वतविशेष्यताशालिनिश्चयत्वेनहेतुतायाआवश्यकतयाउपदर्शित
समूहालंबनपरामर्शजन्यसमूहालंबनानुमितौव्यभिचारोदुरुद्धरएव यत्तुवह्निव्याप्यधूमवान्पर्वतइति

वा॰ पं॰
२

परामर्शस्यकार्यतावच्छेदकंवह्निव्याप्यधूमावच्छिन्नपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निविधेयताशाल्यनुमितित्वंउ
पदर्शितसमूहालंबनस्थले तथाविधधूमावच्छिन्नपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निविधेयताकानुमिसुसत्वभा
वेनव्यभिचारानवकाशादिति॥ तदसत्॥ नीलपर्वतोवह्निव्याप्यधूमाभाववान्पर्वतोवह्निव्याप्यधूमवांश्चेतिसमूहालंब
नादनुमिसुसत्वेपि तथाविधानुमितिंप्रतिपर्वतत्वातिरिक्तधर्मानवच्छिन्नत्वरूपयमुद्दपर्वतत्वावच्छिन्नविशेष्यतानिरूपि
तवह्निव्याप्यधूमाभावप्रकारताशून्यवह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकज्ञानत्वेनहेतुत्वेनीलपर्वतोवह्निव्याप्य
धूमवात्त्वेत्साकारकसंशयादपिवह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमित्यापत्तेर्दुर्वारतयोपदर्शितानुमितित्वाव
च्छिन्नंप्रतितथाविधप्रकारताशून्यमुद्दपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमप्रकारताशालिज्ञानत्वेन
हेतुतायाआवश्यकतयावह्निव्याप्यालोकवान्पर्वतोवह्निव्याप्यधूमवानित्यादिपरामर्शजन्यवह्निव्याप्यालोकवा
न्वह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितौव्यभिचारस्यजागरूकत्वात्॥ ननुधूमपरामर्शकार्यतावच्छेदककोटा

रा॰म॰
२

वपि विशेष्यतायां वह्निव्याप्यधूमातिरिक्तपर्वतत्वातिरिक्तधर्मानवच्छिन्नत्वनिवेशान्नानुपपत्तिः तत्र पर्वतत्वावच्छिन्नविशेष्य
तायां वह्निव्याप्यधूमातिरिक्तवह्निव्याप्यालोकेनाप्यवच्छिन्नत्वात् तथाविधविशेष्यतानिरूपितवह्निविधेयताशाल्यनुमिति
त्वाभावेन व्यभिचारानवकाशादिति। चेन्न। तथापि एकत्र द्वयमिति रीत्या वह्निव्याप्यधूमपर्वतत्वोभयं धर्मितावच्छेदकीकृ
त्य वह्निव्याप्यधूमप्रकारक। वह्निव्याप्यधूमवान् पर्वतो वह्निव्याप्यधूमवानित्याकारकपरामर्शजनितायां वह्निव्याप्यधूम
वान् वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्यनुमितौ व्यभिचारस्य दुर्वारत्वादिति चेत्। मैवं। आचार्यमते वह्निव्याप्यधूमप्रकार
तानिरूपितपर्वतत्वातिरिक्तधर्मानवच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्नविधेयताशाल्यनुमितित्वावच्छिन्नं प्रति शुद्ध
पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमप्रकारताशालिनिश्चयत्वेन हेतुत्वकल्पनान्नानुपपत्तिरिति। न च धूमपरामर्श
स्य तथाविधकार्यतावच्छेदकत्वेपि वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्यनुमितेर्वह्निव्याप्यधूमप्रकारतानिरूपितपर्वतत्वा
तिरिक्तवह्निव्याप्यधूमावच्छिन्नविशेष्यतानिरूपकत्वाद्धूमपरामर्शजन्यतावच्छेदकानाक्रान्तत्वापत्तिर्जागरूकैवाचार्यमते

तिवार्यानारशानुमितौ तथाविधविशेष्यतायासत्वेपि तदीयपर्वतविशेष्यतायाःपर्वतत्वातिरिक्तधर्मावच्छिन्नत्वरूपेणावह्निव्याप्यधूमप्र
कारतानिरूपितत्वानभ्युपगमेन पर्वतत्वातिरिक्तधर्मावच्छिन्नविशेष्यतात्वरूपेणावह्निव्याप्यधूमप्रकारतानिरूपितत्वविशिष्टवि
शेष्यताभिन्नाया वह्निव्याप्यधूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निविधेयताशालिन्यनुमितित्वस्य
धूमपरामर्शकार्यतावच्छेदकत्वाङ्गीकारे शेषोपदर्शितदोषानवकाशात्पर्वतत्वातिरिक्तधर्मावच्छिन्नविशेष्यतात्वरूपेणा
धूमप्रकारतानिरूपितत्वविशिष्टविशेष्यतात्वं च पर्वतत्वातिरिक्तधर्मावच्छिन्नविशेष्यतात्वावच्छिन्नवह्निव्याप्यधूमप्रका
रतानिरूपकताकविशेष्यतात्वं उपदर्शितानुमितीयपर्वतविशेष्यतायान्तत्र वह्निव्याप्यधूमप्रकारतानिरूपकतायास्त्ववच्छे
दकं न वह्निव्याप्यधूमावच्छिन्नविशेष्यतात्वं तथा सति तादृशानुमितेर्वह्निव्याप्यधूमवान्वह्निव्याप्यधूमवान्पर्वतो वह्निमा
नित्याकारकतापत्तेः॥ किन्तु तथाविधनिरूपकतावच्छेदकं पर्वतत्वावच्छिन्नविशेष्यतात्वमिति तथाविधानुमितेर्वह्नि
व्याप्यधूमपरामर्शोपि दर्शितकार्यतावच्छेदकाक्रान्तत्वमक्षतमेवा एवंरकत्वद्वयमिति॥ सा वह्निव्याप्यधूमपर्वतत्वोभयधर्मा

तावच्छेदकीभवद्वह्निव्याप्यधूमप्रकारकात् वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यधूमवानित्याकारकपरामर्शात्तत्रायामप्यु
पदर्शितानुमितावपि न व्यभिचारः तादृशानुमितौ वह्निव्याप्यधूमस्य वाऽहृद्यधर्मितावच्छेदकतया भानेऽप्यनुगमेन पर्वतत्वातिरि
क्तवह्निव्याप्यधूमावच्छिन्नविशेष्यतात्वावच्छिन्नवह्निव्याप्यधूमप्रकारतानिरूपकताकपर्वतविशेष्यतायाः सत्त्वेनोपदर्शि
तधूमपरामर्शकार्यतावच्छेदकाक्रान्तत्वाभावात्। एतेन वह्निव्याप्यालोकवान्पर्वत इत्यादिपरामर्शाद् वन्हिव्याप्यधूमवद्न्यो व
ह्न्यभाववानित्यादीनरषाधसहवर्तेन जनितायां वह्निव्याप्यधूमवान्वह्निव्याप्यालोकवान्पर्वतो वन्हिमानित्यनुमितावपि
व्यभिचारो निरस्तः। तादृशानुमितावपि पर्वतत्वातिरिक्तवह्निव्याप्यालोकावच्छिन्नविशेष्यतात्वावच्छिन्नवह्निव्याप्यधूमप्रका
रताकपर्वतविशेष्यताकत्वेनोपदर्शितकार्यतावच्छेदकाक्रान्तत्वादिति॥ न च तथापि वन्हिव्याप्यधूमवान्पर्वत इति परामर्शा
त्पीतपर्वतान्यो वह्न्यभाववानित्यादीनरवाधवत्वाहृत्तत्रायां वह्निव्याप्यधूमवान्पीतपर्वतो वह्निमानित्यनुमितेरुपदर्शितधूम
परामर्शकार्यतावच्छेदकाक्रान्तत्वापत्तिराचार्यमते दुर्वारैवेति वाच्यं। तादृशानुमितेरेकत्र द्वयमिति रीत्या वह्निव्याप्यधूमपीतया

वह्निधर्मितावच्छेदकत्वाभ्युपगमेनयोगेनस्यवह्निव्याप्यधूमधर्मितावच्छेदकत्वाभावात्।नचैवमेतद्विशेष्यताद्वन्निवह्निव्याप्यधूमप्रका
रतानिरूपकतायाःपर्वतत्वातिरिक्तधर्मावच्छिन्नविशेष्यतात्वावच्छिन्नत्वाभावेनोपदर्शितःधूमपरामर्शकार्यतावच्छेदकाक्रांत
त्वस्याक्षतत्वादिति॥केचित्तु॥आचार्यमतेवह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितौवह्न्यंशेकालीनत्वसंबंधेनवह्निव्याप्यधू
मस्यापिभानमंगीक्रियते।नचतथासतितादृशानुमितेर्वह्निव्याप्यधूमवान्पर्वतोधूमकालीनवह्निमानित्याकारकतापत्तिरिति
वाच्यं।यत्रसंयोगसंबंधावच्छिन्नवह्निव्याप्यधूमप्रकारतानांसंबंधावच्छिन्नवह्निव्याप्यधूमप्रकारतानामभिन्नेवह्निविशेष्यतानि
रूपितकालीनत्वसंबंधावच्छिन्नवह्निव्याप्यधूमप्रकारतेत्युपदर्शितानुपपत्त्यभावात्॥तथाचतन्मतेपर्वतत्वातिरिक्तधर्मा
नवच्छिन्नविशेष्यतानिरूपितसंयोगसंबंधावच्छिन्नवह्निव्याप्यधूमप्रकारताभिन्नकालीनत्वसंबंधावच्छिन्नवह्निव्याप्यधूमसंप्र
कारतानिरूपितहिविधेयताशाल्यनुमितित्वावच्छिन्नंप्रतिपुरुषपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमप्रकारता
शालिनिश्चयत्वेनहेतुत्वकल्पनात्राऽनुपपत्तिगंधोपि।वह्निव्याप्यालोकवान्पर्वतइतिपरामर्शकालेवह्निव्याप्यधूमवद्योवह्नि

भाववानित्यादीतरबाधबलाद्ध्रदत्रापांवह्निव्याप्यधूमवान्वह्निव्याप्यालोकवान्पर्वतोवह्निमानित्यनुमितौनव्यभिचारः।नाह
शानुष्ठितौकालीवत्वसंबंधेनवन्ह्यंशेवह्निव्याप्यालोकस्यैवभानाभ्युपगमेननिरुक्तधूमपरामर्शकार्यतावच्छेदकधर्माभा
वात्।एवंवह्निव्याप्यधूमवान्पर्वतइतिपरामर्शानपीतास्मोचत्वभाववानित्यादीतरबाधसहकृतात्तत्रायांवह्निव्याप्यधू
मवान्पीतपर्वतोवह्निमानित्यनुमितेरपिनधूमेपरामर्शकार्यतावच्छेदकानाक्रांतत्वप्रसंगः।उपदर्शितनिदर्शनत्रयेपिनस्व
वह्निव्याप्यधूमधर्मितावच्छेदकत्वाभावेनपर्वतत्वातिरिक्तधर्मानवच्छिन्नविशेष्यतानिरूपितस्वसंयोगसंबंधावच्छिन्नवह्नि
व्याप्यधूमप्रकारताभिन्नकालीनतत्संबंधावच्छिन्नवह्निव्याप्यधूमप्रकारतानिरूपितविधेयतापात्रत्वाक्षमत्वात्।एव
मेकत्रद्वयमितिरीत्यावह्निव्याप्यधूमपर्वतत्वोभयधर्मितावच्छेदकीभूतस्ववह्निव्याप्यधूमप्रकारकानवह्निव्याप्यधूमवा
न्पर्वतोवह्निव्याप्यधूमवानित्याकारकपरामर्शोजायमानायांवह्निव्याप्यधूमवान्वह्निव्याप्यधूमवान्पर्वतोवह्निमानि
त्यनुमितावपिनव्यभिचारः।तादृशानुमितौवह्निव्याप्यधूमप्रकारताया द्वैविध्येनोपदर्शितधूमधर्मपरामर्शकार्यतावच्छेद

काङ्क्षितत्वाभावात् ॥ तथा हि । तत्र प्रथमवह्निव्याप्यधूमप्रकारतायाः संयोगसंबंधावच्छिन्नायाः पर्वतत्वातिरिक्तधर्मानवच्छिन्नविशेष्य
तानिरूपितत्वेऽपि मानकालीनत्वसंबंधावच्छिन्नधूमप्रकारतात्मिका ॥ द्वितीयवह्निव्याप्यधूमप्रकारतायाः कालीनत्वसंबंधावच्छि
न्नवह्निव्याप्यधूमप्रकारतात्मकत्वेऽपि मानपर्वतवृत्तितात्मधूमानवच्छिन्नविशेष्यतानिरूपितात् तस्याः पर्वतत्वादितिरिक्तवह्नि
व्याप्यधूमावच्छिन्नविशेष्यतानिरूपितत्वादिति ॥ नत्रस्थह्रदपर्वतत्वावच्छिन्नविशेष्यतानिरूपितसंयोगसंबंधावच्छिन्नवह्नि
व्याप्यधूमप्रकारताभिन्नाकालीनत्वसंबंधावच्छिन्नवह्निव्याप्यधूमप्रकारताभावेन निरुक्तधूमपरामर्शकार्यतावच्छेदक
त्वाभावाद्व्यभिचारानवकाश इति वदंति ॥ तदतीव मंदं ॥ तथा सति कालीनत्वसंबंधेनाहं वह्निधूमइति धूमे अहंत्वित्वग्रहद
शायामाचार्यमते अनुमितित्वपत्त्यापायत्तेः सत्वात् । न च वह्निव्याप्यधूमाभाववान् पर्वत इति बाधबुद्धिदशायां तथाविधेनु
मितिस्वपत्वायस्येष्टापत्तिरेव तथाविधाहित्वग्रहकालेऽपि आचार्यमते तादृशानुमितेरापत्त्यापसेष्टापत्तिर्नैव विरुद्धेति वा
च्यं ॥ धूमपरामर्शजन्यानुमितौ वह्निव्याप्यधूमादिविषयकत्वानंगीकारे वह्न्यनुमितिं प्रति धूमपरामर्शस्याहेतुतायां व्यभिचारेणा

तत्तद्विषयकत्वं स्वीकृत्य धूमाभाववान्पर्वत इत्यादिबाधबुद्धिदशायां तथापि विधानुमित्यपत्त्यायस्येष्टापत्तेरस्यानुपय
त्वंगीकारात्। प्रकृते तु धूमपरामर्शकार्यतावच्छेदकनिर्वचनस्य अन्यथोपपत्तेनेह प्रदर्शितत्वात् तत्रानुमितौ वह्न्यंशे कालीन
त्वसंबंधेन धूमप्रकारकत्वमभ्युपेत्य तथाविधवह्नित्वज्ञानदशायामनुमित्यनापत्तेरिष्टापत्तेरसंभवदुक्तिकत्वादिति॥ ननु
आचार्यमते वह्निविधेयकानुमितिं प्रति परामर्शहेतुतायामन्यलिंगकानुमितौ व्यभिचारणात्वार्थधूमपरामर्शजन्या
नुमितौ धूमस्यैव भानमुपेयतामलं व्याप्तिभानाभ्युपगमेन। न च नांगीक्रियत एव तन्मतेप्यनुमितौ व्याप्तिविषय
कत्वमाचार्यस्य न सम्मतिद्धमिति तत्रेष्टापत्तेरसंभवादिति चेत्॥ अत्र केचित्॥ व्याप्तेर्नानाविधतया विनिगमनाविरहेण नाना
नाविधव्याप्तिविशिष्टहेतुमज्ज्ञाननिष्ठयानामेवानुमितिं प्रति हेतुत्वस्यावश्यकत्वं॥ तथा चाचार्यमते अनुमितौ व्याप्तिभा
नानंगीकारे वह्न्यत्यंताभाववदवृत्तित्वरूपव्याप्त्यवगाहिपरामर्श वह्निमद्भेदात्यन्ताभाववदवृत्तित्वरूपव्याप्त्यवगाहिप
रामर्शयोर्धूमवान्पर्वतो वह्निमानित्याकारकानुमितिस्वीकारे नैषां परस्परव्यभिचारेणावह्न्यनुमितिं प्रति धूमपरामर्श

हेतुतापानिर्वह्निकुमशक्यतयानन्मतेतत्तद्व्याप्तिविषयकपरामर्शजन्यानुमितौ तत्तद्व्याप्तिभानांगीकार आवश्यक इत्याहुः तदसत् ला
घवेनानुमितिं प्रति साध्याभाववदवृत्तित्वनिरूपकव्याप्त्यवगाहिपरामर्शस्य हेतुताकल्पनात् लाघवं च जनकतावच्छेदकशरीरस्य । न
व्याप्तिः । अनुमितिं प्रति साध्याभाववदवृत्तित्वावगाहिपरामर्शस्य हेतुतामते द्रव्याभाववदवृत्तित्वसमवायेनद्रसादिप
रामर्शाद्वा समवायसंबंधावच्छिन्नवह्न्यभाववदवृत्तित्वावगाहिपरामर्शाच्च संयोगसंसर्गकपर्वतो वह्निमानित्याकारकानु
मितिवारणाय पर्वतो हृश्यपकसंयोगसंसर्गकानुमितिं प्रति समवायसंबंधावच्छिन्नवह्नित्वनिष्ठावच्छेदकतानिरूपितसं
योगसंबंधावच्छिन्नप्रतियोगितासंबंधावच्छिन्नप्रकारतानिरूपितभावप्रकारतानिरूपिताधिकरणताप्रकारतानिरूपित
वृत्तित्वप्रकारतानिरूपिताभावप्रकारतानिरूपितसमप्रकारतानिरूपितपर्वतनविशेष्यताशालिनिश्चयत्वेन हेतुत्वकल्प
नमावश्यकं । अनुमितिं प्रति साध्यवदन्यावृत्तित्वावगाहिपरामर्शस्य हेतुतामते च द्रव्यवदन्यावृत्तित्वावगाहिपरामर्शा
त्संयोगसंसर्गकपर्वतो हृश्यपकवह्निविधेयकानुमितिवारणाय तादृशानुमितिं प्रति समवायसंबंधावच्छिन्नवह्नित्वनिष्ठावच्छे

दकतानिरूपितसंयोगसंबंधावच्छिन्नवह्निनिष्ठावच्छेदकतानिरूपितप्रतियोगितासंबंधावच्छिन्नप्रकारतानिरूपितभेद
निष्ठप्रकारतानिरूपितत्वअधिकरणप्रकारतानिरूपितवृत्तित्वप्रकारतानिरूपिताभावप्रकारतानिरूपितधूमप्रकारता
निरूपितपर्वतविशेष्यताशालिनिश्चयत्वेन हेतुत्वमित्यन्योन्याभावघटितोपदर्शितव्याप्त्यवगाहिपरामर्शस्य हे
तुतामते एकावच्छेदकतांशस्य एकनिरूपकतांशस्य च निवेशाधिक्येनानुमितिजनकतावच्छेदकशरीराधिक्यमा
ति स्फुटत्वादित्याचार्यमते अनुमितौ व्याप्तिविषयताया उपदर्शितप्रयुक्तिः लब्धा मोहसंपादिकेति ध्येयं॥ केचित्तु॥
अनुमितौ व्याप्तिविषयताभ्युपगमे अनुमितिं प्रति परामर्शस्य सामान्येन हेतुताकल्पनेन लाघवं। तथाहि॥ आचार्यम
ते वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्याद्यनुमितौ वह्निव्याप्यधूमविशिष्टपर्वतत्वविशिष्टे वह्नौ वैशिष्ट्यावगाहितया
विशिष्टवैशिष्ट्यमिति रीत्या विषयता। तादृशानुमितिं प्रति विशेष्यतावच्छेदकप्रकारकनिर्णयस्य हेतुत्वेन तत्राधि
विशेष्यतावच्छेदकप्रकारकतानविधया वह्निव्याप्यधूमप्रकारकनिश्चयस्यापेक्षणीयतया धूमपरामर्शस्यापेका

वा·थे·

लेनथाविधानुमितेरापत्तभावात्।अनुमितिंप्रतिपरामर्शस्यस्वातंत्र्येणहेतुत्वकल्पनंनिरर्थकमेवेति।ननुतथाविधानुमितिंप्र
तिपरामर्शादेःस्वातंत्र्येण।हेतुत्वाकल्पनेवन्हिव्याप्यधूमवान्पर्वतइत्यादिपरामर्शकालेवह्निव्याप्यधूमवान्पर्वतोघटवा
नित्याद्यनुमित्यापत्तिः वह्निव्याप्यधूमवान्पर्वतइत्यादिविशेष्यतावच्छेदकप्रकारकनिर्णयस्यवह्निव्याप्यधूमप्रकारतानि
रूपितपर्वतत्वावच्छिन्नविशेष्यताभिन्नधूमावच्छिन्नविशेष्यताशालिबुद्धित्वावच्छिन्नंप्रतिहेतुत्वेनतस्यकस्यापिकार्यतावच्छे
दकाक्रांतत्वादिति॥नचवह्निव्याप्यधूमवान्पर्वतोघटवानित्यनुमितित्वादेःकस्यचित्कार्यतानवच्छेदकतयानरवच्छिन्ना
पत्तेरसंभवः।वह्निव्याप्यधूमप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताभिन्नधूमावच्छिन्नविशेष्यताशालिज्ञानत्वा
वच्छिन्नतिष्टमेव।तदावह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितेरेवोत्पत्तेरितिवाच्यं।वह्निव्याप्यधूमवान्पर्वतोघ
टवानित्यनुमितिंप्रतिसिषाधयिषाविरहविशिष्टवह्निव्याप्यधूमवान्पर्वतोघटवानितिसिध्यभावरूपकारणाबलान्न
थाविधानुमित्यापत्तिर्दुर्वारैवेति॥नचाचार्यमतेतथाविधानुमितेरप्रसिध्यातादृशानुमितिंप्रतितथाविधसिध्यभाव

राम·

स्यहेतुत्वकल्पनमप्यसंभवदुक्तिकमितिवाच्यं॥ तन्मतेनतादृशानुमितेरप्रसिद्ध्यातथाविधानुमितिर्निरुक्तितथाविधसिद्ध्यभा
वस्याहेतुत्वेपिवह्निव्याप्यधूमवान्पर्वतोघटवानितिपरामर्शकालेवह्निव्याप्यधूमवान्घटव्याप्यवान्पर्वतोघटवानि
त्यनुमितेःप्रसिद्धत्वाद्वह्निव्याप्यधूमातिरिक्तघटव्याप्यातिरिक्तपर्वतत्वातिरिक्तधर्मानवच्छिन्नविशेष्यतानिरूपितघट
निष्ठविधेयताशाल्यनुमितित्वावच्छिन्नंप्रतितथाविधानुमितिविषयकेच्छाभावविशिष्टवह्निव्याप्यधूमवान्घट
व्याप्यवान्पर्वतोघटवानितिसिद्धिसिद्ध्यभावस्यावश्यहेतुतयातद्वत्वाद्वह्निव्याप्यधूमवान्पर्वतइतिपरामर्शकाले
तद्धर्मावच्छिन्नापत्तेर्कीयमाणायांतादृशानुमित्यापत्तेर्वज्रलेपायितत्वात्। नचतादृशसिद्ध्यभावस्यवह्निव्याप्यधूमा
वच्छिन्नघटव्याप्यावच्छिन्नपर्वतत्वावच्छिन्नविशेष्यतानिरूपितघटविधेयताशाल्यनुमितित्वमेवकार्यतावच्छेदकंअस्त
किमुक्तत्रितयविशिष्टाभाववटितधर्मस्यकार्यतावच्छेदकत्वेनेतितादृशानुमितेस्तदनाक्रान्ततयाननतदापत्तिर्नवा
तादृशानुमितित्वावच्छिन्नाप्रसिद्धिः। तादृशतात्पर्ययोगिवह्निव्याप्यधूमवान्घटव्याप्यवान्पर्वतइतिविशेष्यतावच्छेद

वा॰ थे॰
८

कप्रकारकनिर्णयाभावादिति वाच्यं। तथा सति तथाविधसिद्धिकालेपि घटव्याप्यवानच वह्निव्याप्यधूमवान्घटव्याप्यवान्पर्वतो
घटवानिति सधिकविषयिण्या अनुमितेरापत्तेः तथापि विधविशिष्टाभावघटितधर्मस्य सिद्ध्यभावकार्यतावच्छेदकत्वावश्य
कत्वादिति चेन्न। वह्निव्याप्यधूमवान्घटव्याप्यवान्पर्वतो घटवानित्येतादृशसिद्ध्यभावेन फलजननेन वह्निव्याप्यधूमवान्
पर्वतो घटव्याप्यवानित्यादिपरामर्शस्य सहकारित्वकल्पनात् वह्निव्याप्यधूमवान्पर्वत इत्येतादृशपरामर्शकाले तथा
विधसिद्ध्यभावबलात् तादृशानुमित्यापत्तेरसंभवात्। अनुमितौ व्याप्तिविषयतानभ्युपगमे तु तस्य धूमादिविशिष्टेत
रवैशिष्ट्यानवगाहितया तत्र च धूमवान्पर्वत इत्यादिज्ञानस्य विशेष्यतावच्छेदकनिर्णयविधया अपेक्षितत्वात्तथाव
ह्निव्याप्यधूमवान्पर्वत इति निर्णयशून्यकाले धूमवान्पर्वत इत्यादिनिर्णयकाले च धूमवान्पर्वतो वह्निमानिति सा
धनुमित्यापत्तेर्दुर्वारत्वात्। अनुमितौ व्याप्तिविषयकत्वमाचार्यमते निर्दुष्टमेवेत्याहुः। तदसत्। तथा हि विशेष्यता
वच्छेदकप्रकारकनिर्णयस्य कार्यतावच्छेदकं न विशिष्टवैशिष्ट्यावगाहिज्ञानत्वं। तथाविधानुभवत्वं। आद्ये स्वतोऽभि

राम॰
८

चारणात्तद्धितीयेपि नित्यसाधारण्यापातात् ॥ न च जन्यत्वं कार्यतावच्छेदककोटौ निवेशनीयमिति वाच्यं । जन्यत्वस्य ध्वंसप्रतियोगि
त्वप्रागभावप्रतियोगित्व कालिकसंबंधेन घटवत्त्वादिभेदेन बहुविधतया तेषां विनिगमनाविरहात्तन्निवेशापादकका
र्यकारणभावानन्त्यप्रसंगात् । किंतु विशेष्यतावच्छेदकप्रकारकनिर्णयस्य कार्यतावच्छेदककोटिप्रविष्टतया दू
रस्थस्य व्याहृतास्मदादिप्रत्यक्षसाधारण्येऽपि कांजानिं स्वीकृत्य सैव तत्कार्यतावच्छेदिकांगीकार्या ॥ एवं चाचार्यमते वह्निव्या
प्यधूमप्रकारकनिर्णयरूपविशेष्यतावच्छेदकप्रकारकनिर्णयकार्यतावच्छेदकानाक्रांततया तथाविधानुमितेर्धू
मपरामर्शसमकालेऽप्यापत्तिवारणायानुमितिं प्रति धूमपरामर्शस्य स्वातंत्र्येण हेतुत्वकल्पनावश्यकमेवेति ॥ तन्मतेऽ
नुमितौ व्याप्तिविषयताभ्युपगमे उपदर्शितलाघवानवकाश इति । अत्रेदं समाधानमाकलयामः । नित्यवृत्तिधर्मस्य का
र्यतावच्छेदकत्वे दोषविरहात् ॥ विशिष्टवैशिष्ट्यविषयताशाल्यनुमितित्वमेव विशेष्यतावच्छेदकनिर्णयकार्यता
वच्छेदकमुच्यते । तथा चाचार्यमते व्याप्तिविषयताभ्युपगमे उपदर्शितलाघवं निष्प्रत्यूहमेव । ननु नित्यवृत्तिधर्मस्य का

वा॰ थे॰
९

येनावच्छेदकत्वेकारणत्वानुपपत्तिः तथाहि।कारणत्वंयद्धनन्यथासिद्धत्वेसतिकार्याव्यवहितपूर्वक्षणावच्छेदेनकार्याधिकरणवृ
त्तित्वंतदभावप्रतियोगितानवच्छेदकधर्मवत्त्वं।तदेकघटरूपकार्याव्यवहितपूर्वक्षणावच्छेदेनापरघटरूपकार्याधिकरणे
दंडाभावसत्त्वात्तद्घटंप्रतिदंडत्वेनहेतुतायाअनुपपत्तिः।तस्मात्कार्यतावच्छेदकावच्छिन्नयावद्व्यक्तीनांतद्व्यक्तित्वेनघटत्वा
तत्तद्व्यक्तित्वव्यवहितपूर्वक्षणावच्छिन्नतत्तद्व्यक्त्यधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्त्वमेवकारणत्वं।त
थाचनित्यवृत्तिधर्मस्यकार्यतावच्छेदकत्वेनित्यव्यक्तेरपितत्तद्व्यक्त्यन्तःपातितयातदव्यवहितपूर्वक्षणाप्रसिध्याप्रकृतेन
कारणत्वानुपपत्तिरितिचेन्न।कार्यतावच्छेदककारणतावच्छेदकभेदेनकारणतायाभिन्नत्वात्तत्रनित्यवृत्तिधर्मःकार्य
तावच्छेदकस्तत्रनित्यव्यतिरिक्तव्यक्तीनामेवतद्व्यक्तित्वेननिवेशान्नानुपपत्तिरित्यपि।केचित्तु।अनुमितिंप्रतिपरामर्श
स्यत्वान्तरेणहेतुत्वाकल्पनेउक्तपर्वतविशेष्यकवह्निव्याप्यवत्तानिर्णयात्सर्वेतविशेष्यकवह्निविधेयकानुमित्या
पत्तिः।विशिष्टवैशिष्ट्यबुद्धिंप्रतिविशेष्यतावच्छेदकप्रकारकनिर्णयस्यधर्मिविशेषणमेनंतर्हिहेतुत्वकल्पनेनतेनोपदर्शि

राम॰
९

तापत्तिवारणासंभवादिति धर्मिविशेषणमंतर्भाव्यानुमितिं प्रति परामर्शस्य स्वातंत्र्येण हेतुत्वकल्पनमावश्यकत्वे फलमनुमितौ
व्याप्तिविषयत्वेनेत्याहुः॥ तदयुक्तं एकपर्वते वह्निव्याप्यवत्ताज्ञानात् पर्वतान्तरे वह्निविधेयकानुमितिर्न जायत इति के
नानिर्णीतं। येन तद्वारणार्थं धर्मिविशेषणमंतर्भाव्यानुमितिपरामर्शयोः स्वातंत्र्ये हेतुमद्भावः कल्पनीयः। भवतु वा तथानुभ
वः तथापि विशिष्टवैशिष्ट्यबोधे विशेष्यतावच्छेदकप्रकारकनिर्णयस्यैव धर्मिविशेषणमंतर्भाव्य कार्यकारणभावक
ल्पनेनैवोपपत्तौ नापत्तिवारणासंभवात्। अनुमितिं प्रति परामर्शस्य स्वातंत्र्येण हेतुत्वकल्पनं निरर्थकमेवेति॥ न च तथा सति
एकपर्वतविशेष्यकं वह्निव्याप्यवत्तानिर्णयात् सर्वतान्तरविशेष्यकविशिष्टवैशिष्ट्यबोधानुत्पत्तेरिति वाच्यं। इष्टापत्तेः। अनु
भवस्यापि तथानिर्णायायत्तेस्तु॥ पत्नु॥ पर्वतत्वसामानाधिकरण्येन वह्निव्याप्यवत्तानिर्णयात् अवच्छेदकावच्छेदेन तथावि
धविशिष्टवैशिष्ट्यावगाहिबोधवत्सिद्ध्यभावबलात् पर्वतत्वावच्छेदेन वह्निविधेयकानुमितेरनुपपत्तिरित्यवच्छेदकाव
च्छेदेनानुमितिं प्रति अवच्छेदकावच्छेदेन परामर्शस्य स्वातंत्र्येण हेतुत्वकल्पनमावश्यकमिति कृतमनुमितौ व्याप्तिविषय

वा·व्ये·
१०

नयेनितानरस्रसतासीध्यभावेनानुमितनेनेम्नुहसंवधघटितवह्निव्यापकतावगाहिम्प्रवच्छिन्नसंयोगसंसर्गकहेतुमत्त्वावगाहियरामर्श
वच्छिन्नसंयोगघटितवह्निव्यापकत्वावगाहिम्नुहसंयोगसंसर्गकहेतुमत्तावगाहिपरामर्शयोरुमतरस्यसहकारितकल्पनेनतुतस्या
नीमवच्छेदकावच्छेदेनवह्न्यनुमित्यापत्तिवारणासंभवात्। अथानुमितिप्रतियरामर्शस्यस्वातंत्र्येणहेतुत्वाकल्पनेअनुमितौवि
धेयभानानुपपत्तिर्विशिष्यतावच्छेदकप्रकारकनिर्णयकार्यतावच्छेदककोटौविधेयतानिवेशादितिचेन्न। सिषाधयिषावि
रहविशिष्टसिध्यभावकार्यतावच्छेदकत्वाद्विधेयतायाअनुमितौविधेयभानोपपत्तेः। सिध्यभावकार्यतावच्छेदककोटौविधे
यतापानिवेशआवश्यकः। अन्यथापर्वतोवह्निमानित्यादिसिद्धिकालेवह्निंधर्मितावच्छेदकीकृत्यघटविधेयकानुमित्यनु
पपत्तेरिति। केचित्तु। आचार्यमतेअनुमितौव्याप्तिविषयतानभ्युपगमेविशिष्टस्यवैशिष्ट्यमितिरीत्यावह्निव्याप्यधूमपर्वतन
त्वोभयधर्मितावच्छेदकीकृत्यवह्निव्याप्यधूमप्रकारकात्वह्निव्याप्यधूमवान्पर्वतोवह्निव्याप्यधूमवानित्याकारकपराम
र्शात्वह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितिर्निर्वाहायतस्यअनुमितिप्रतिस्वातंत्र्येणहेतुत्वकल्पनेगौरवेनाभ्युपगमे

राम०
१०

तुनराशुद्धपर्वतत्वधर्मितावच्छेदकवह्निव्याप्यधूमपरामर्शस्याकल्पकत्वात्तद्धानन्तरानीं वह्निव्याप्यधूमवान्पर्वतो वह्निमा
नित्यनुमितिनिर्वाहे तु तथाविधपरामर्शस्य स्वातन्त्र्येण हेतुत्वं न कल्प्यत इति लाघवादनुमितौ व्याप्तिविषयतासिद्धिः।
न च तथाविधपरामर्शदशायामाचार्यमते यो वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितिस्वीकारे चिन्तामणिका
रमतावैलक्षण्यापत्तिरिति वाच्यं॥ तेन क्षतेरभावात्॥ केचित्तु॥ अनुमितौ व्याप्तिविषयतानभ्युपगमे वह्निव्याप्यालो
कवान्पर्वत इत्याहार्यपरामर्शकाले वह्निव्याप्यधूमवत्त्वेऽपि सर्वतान्यो वह्न्यभाववानित्यादितद्बाधदशायां वह्निव्याप्यधूमप
र्वतत्वोभयं धर्मितावच्छेदकीकृत्य वह्निविधेयकानुमित्युपपत्तये तथाविधानुमितित्वावच्छिन्नं प्रति तथाविधे तद्बाध
स्य स्वातन्त्र्येण हेतुत्वकल्पने गौरवं तदङ्गीकारे तु तथाविधे तद्बाधदशायां पर्वतविशेष्यकवह्निव्याप्यधूमप्रकारकनि
र्णयस्यावश्यकत्वात् तत एव तथाविधानुमित्युपपत्तेः तथाविधे तद्बाधस्यानुमितिं प्रति स्वातन्त्र्येण हेतुत्वाकल्पनप्रयुक्तलाघ

वमरंवडितमेवेत्याहुः। तदसत्। अनुमितिं प्रतिपक्षमुख्यविशेष्यकपरामर्शस्यैव हेतुतया अनुमितौ व्याप्तिविषयताभ्युपग
मेपि तथाविधेतरं वाधस्य स्वातंत्र्येण हेतुत्वकल्पनमावश्यकमेव॥ न चानुमितिजनकतावच्छेदककोटौ मुख्यविशेष्यताया
निवेशे प्रयोजनविरह इति वाच्यं। तथा सत्यनुमितित्वं जनकतावच्छेदककोटौ वह्निव्याप्यधूमवत्पर्वतवानदेश इत्याद्यनंता
हार्यताततद्व्यक्तीनां त्वत्तत्त्वावच्छिन्नप्रतियोगिताकभेदकूटस्यानिवेशेन लाघवसंभावात्॥ न चाचार्यमते पक्षमुख्यविशे
ष्यकपरामर्शस्यानुमितिहेतुत्वे उपदर्शितनिरवाधानामनुमितिं प्रति स्वातंत्र्येण हेतुत्वकल्पनाधिक्येन लाघवासंभव इति
वाच्यं॥ अनुमितिजनकतावच्छेदककोटौ वनंततत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटनिवेशेन एवं विशेषणविशे
ष्यभावे विनिगमनाविरहेण अनंतकार्यकारणभाववाहुल्यात्। कारणतावच्छेदकगौरवाच्च तदपेक्षया तथाविधेतरबाधा
नां किं यत्तामनुमितिं प्रति स्वतंत्रहेतुत्वकल्पनमेवोचितमिति। अत एव विधिवादे याकानुमाने पक्षधर्मिकत्वेरपि पक्षमुख्यवि

शेष्यकपरामर्शस्यैवानुमितिहेतुत्वमुक्तमित्यपि सङ्गच्छते॥ अन्यथा तादृशग्रन्थविरोधस्य त्वन्मतेऽपि दुःसमाधेयत्वादि
ति न किंचिदेतत्। केचित्तु॥ आचार्यमते अनुमितौ व्याप्तिविषयतास्वीकारे धूमलिङ्गकपरामर्शजन्यानुकिंचिदेतत्।
केचित्तु॥ आचार्यमते अनुमितिं प्रति अनुमित्साविरहविशिष्टप्रत्यक्षेच्छाविशिष्टायः वह्निव्याप्यधूमाभाववान्पर्वतो
घटवानित्यादिविशिष्टवैशिष्ट्यबोधात्मकप्रत्यक्षसामग्र्याः प्रतिबंधकताकल्पनेन लाघवसंभवात्। तथाहि। तादृश
सामग्रीकाले वह्निव्याप्याभाववान् पर्वत इति निर्णयस्य विशेष्यतावच्छेदकप्रकारकनिर्णयविधया आवश्यकत्वे
न तदा वह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकज्ञानप्रतिबंधकीभूतबाधनिर्णयसत्त्वात् तदुत्पादेन तथाविधानु
मित्साघटितचारणासंभवात्। तथाविधानुमितिं प्रति तथाविधप्रत्यक्षसामग्र्याः प्रतिबंधकत्वकल्पनेन प्रयोजनविरहे
ण लाघवसंभवात्॥ अनुमितौ व्याप्तिविषयताया अनभ्युपगमे तु वह्निव्याप्याभाववान् पर्वत इति ज्ञानस्य धूमवान्प
र्वतो वह्निमानिति ज्ञाने प्रतिबंधकतया तथाविधसामग्रीकाले तथाविधानुमित्सापत्तेः प्रकारांतरेणावारणासंभवात्धूम

वानयर्वतोवह्निमानित्यनुमितिंप्रतितथाविधसामग्र्याःप्रतिबंधकत्वमावश्यकमितिगौरवाद्याचार्यमतेअनुमितौव्याप्तिवि
षयतास्वीकारस्यावश्यकइत्याहुः॥तदसत्॥अनुमितौव्याप्तिविषयतायाअनभ्युपगमेपिधूमवान्पर्वतोवह्निमानि
त्यनुमितिंप्रतितथाविधसामग्र्याःस्वतंत्रप्रतिबंधकत्वाकल्पनेनानुमितौव्याप्तिविषयताभ्युपगमेसर्वोपदर्शितलाघ
वस्यासंभवात्॥तथाहि॥अनुमितौव्याप्तिविषयताभ्युपगमेपिवह्निव्याप्यधूमवद्व्यमित्याकारकपरामर्शजन्यानुमिता
ववश्यंतथाविधसामग्र्याःप्रतिबंधकत्वंकल्पनीयं।अन्यथातादृशसामग्रीकालेतथाविधानुमित्यापत्तेर्दुर्वारत्वात्॥ए
वंचानुमितौतदनभ्युपगमेपितत्तादृशसामग्र्याःप्रतिबंधकत्वेकल्पनीयेद्रव्यत्वादिधर्मितावच्छेदकमनिवेश्यधूम
निष्ठप्रकारतानिरूपितधर्मितावच्छेदकत्वसंबंधेनवह्निविधेयकानुमितिंप्रतिस्वीयानुमितिनिष्ठविशेष्यतानिरूपित
विशेष्यकत्वप्रकारतानिरूपितवह्नित्वत्वन्नप्रकारतानिरूपितप्रकारतासंबंधावअवच्छिप्रतियोगिताकेच्छाविरह
विशिष्टप्रत्यक्षेच्छाविशिष्टतथाविधप्रत्यक्षसामग्र्यांप्रतिबंधकत्वकल्पनयैवतथाविधप्रत्यक्षसामग्रीकालेधूमवान्पर्वतो

वह्निमानित्यनुमितिवारणासंभवात्नतथापिविधानुमितिंप्रतितथाविधप्रत्यक्षसामग्र्याःप्रतिबंधकत्वंस्वातंत्र्येणानकल्प
नइतिकगौरवावकाशः॥नचैवंसतितथाविधप्रत्यक्षसामग्र्याइ।तत्कारणाविशिष्टविशेष्यतावच्छेदकप्रकारकनिर्ण
यात्मिकायाश्चभावस्यपर्वतत्वादौसर्वदासत्त्वेनतत्सामग्रीकालेपिपर्वतत्वादौतदभावमत्ताशेष्यतावच्छेदकतासंबंधे
नवह्निविधेयकानुमित्यापत्तिर्दुर्वारैवेतिवाच्यं॥तत्रैककालीनत्वसंबंधेनतथाविधसामग्र्याःप्रतिबंधकत्वकल्पनात्॥न
चैकपुरुषीयानुमितिसामग्रीकालेपुरुषांतरीयतथाविधप्रत्यक्षसामग्रीकालेतस्यानुमित्यनुपपत्तिरितिवाच्यं।तन्न
पुरुषीयत्वंनिवेश्यप्रतिबध्यप्रतिबंधकत्वकल्पनात्॥नचैवंगौरवावकाशः।तन्नत्पुरुषीयत्वादेरपिधर्मितावच्छेद
कतयाआत्मनिष्ठप्रत्यासत्तिकल्पेपिपुरुषभेदेनकार्यकारणभाववाहुल्यस्यावश्यकत्वात्पर्वतत्वादिभेदेनप्रतिबध्य
प्रतिबंधकभावकल्पनायाःपुनराधिक्यादिति॥अपरेतु॥अनुमितौव्याप्तिविषयतानभ्युपगमेनतेजोव्याप्यधूमवान्
पर्वतइत्यादिपरामर्शकालेवह्निभिन्नतेजोभाववान्पर्वतइत्यादौनरवाधदशायामपिधूमवान्पर्वतोवह्निमानितिसम

स्यात्तत्रैवव्यभिचारेणाधूमवान्पर्वतोवह्निमानित्यनुमितिंप्रतिधूमपरामर्शादेर्हेतुतायामसंभवः।।अनुमितौव्याप्तिविषयतायां
अभ्युपगमेतुवह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितिंप्रतिधूमपरामर्शस्यहेतुतयानेनोव्याप्यधूमवान्पर्वतइत्या
दिपरामर्शकालीनतथाविधेतरबाधजन्यतेनोव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितेर्धूमपरामर्शकार्यतावच्छेदकाना
क्रांततयातत्रव्यभिचाराभावेनोपदर्शितबाधकानवतारइति।।नचतथाविधपरामर्शकालीनतथाविधेतरबाधबलाद्व
ह्नित्वावच्छिन्नविधेयकानुमितिः।तदैवानुमितौव्याप्तिविषयताभ्युपगमेउपदर्शितदोषसंभवः तदेवनाकिंत्वनुमि
तौव्यापकतावच्छेदकरूपेणैवविधेयभाननियमेनतत्रैतज्जत्वरूपेणैववह्निविधेयकानुमितेरंगीकारादितिवाच्यं।।न
थाविधपरामर्शकालीनतादृशेतरबाधजन्यानुमित्युत्तरंपर्वतोवह्निमान्नवेतिसंशयाभावस्यानुभवसिद्धतयातद्रक्षार्थंत
न्नवह्नित्वादिरूपेणावह्निविधेयकानुमितेरंगीकार्यत्वात्।।नचपूर्वतथासमुपदर्शितनियमभंगप्रसंगइतिवाच्यंलाघवज्ञा
नेतरबाधातिरिक्तस्थलेतथाविधनियमाभ्युपगमात्।अतएवव्यापकतानवच्छेदकमपिरूपंलाघवज्ञानादिबलादनुमि

तोभासत्वप्रवृत्तिप्रवाहोऽपि संगच्छते॥ तथा चानुमितौ व्याप्तिविषयतायामुपदर्शितयुक्तिर्निरवाधैव॥ यत्तु॥ तथाविधेतर
वाधजन्यानुमितौ वधूमो वह्नित्वस्यैव तेजस्त्वस्यापि भानांगीकारात्। तत्रैतेजस्त्वस्यैव विधेयतावच्छेदकत्वं स्वीक्रियते न तु
वह्नित्वमनुमितौ व्यापकतावच्छेदकत्वेन गृहीतस्य धर्मस्य विधेयतावच्छेदकत्वनियमात्। तथा च धूमपरामर्शादनु
मितौ व्याप्तिभानं निर्युक्तिकमेवेति॥ तदसत्॥ तत्र॰ तथाविशेषेतरवाधजन्यानुमितौ तेजस्त्वस्यैव वह्नित्वस्यापि विधे
यतावच्छेदकत्वे क्षतिविरहात्॥ अत एव तेजस्त्वविशिष्टवह्निव्याप्यवान् वह्निभिन्नतेजोभाववान् तद्यत्वैतत्कालीनतेजोव्या
प्यधूमवान्पर्वत इत्यादिपरामर्शस्यापि तेजस्त्वविशिष्टवह्निमान्पर्वत इत्याद्यनुमितिप्रति श्यांतं श्रेगाहे तु त्वं न कल्प्य
ते तादृशपरामर्शकाले तथाविधेतरवाधकालीनतेजोव्याप्यधूमवान्पर्वत इत्याकारकपरामर्शत्वावच्छिन्नस्य तस्या
वश्यकतया तद्वह्नित्वतेजस्त्वोभयावच्छिन्नविधेयताकानुमितेरुत्पत्त्यैव तथाविधफलनिर्वाहात्। तथाविधेतर
वाधजन्यानुमितौ वह्नित्वस्याविधेयतानवच्छेदकत्वे तु उपदर्शितपरामर्शकाले तदुभयावच्छिन्नविधेयताकानुमिते

रानुभविकतया तन्निर्वाहिर्यं ।। तदुभयधर्मावच्छिन्नविधेयताकानुमितिं प्रति तथाविधपरामर्शस्य स्वतन्त्रहेतुत्वकल्पनस्यावश्य
कतया गौरवस्य बहुतरोपि दुर्वारत्वादिति ।। तथा चानुमितौ व्याप्तिविषयत्वानभ्युपगमे तथाविधेन बाधजन्यानुमितेरपि
धूमपरामर्शजन्यतावच्छेदकवह्नित्वावच्छिन्नविधेयताकानुमितित्वरूपकार्यतावच्छेदकाक्रान्ततया धूमपरामर्शहे
तुतायां तत्र व्यभिचारस्यावश्यकत्वात्तद्वारणार्थमनुमितौ व्याप्तिविषयताभ्युपगमस्यावश्यक इति ।। न च धूमत्ववह्नित्वा
वच्छिन्नविधेयताशाल्यनुमितित्वस्य वह्निव्याप्यधूमवान्पर्वत इति परामर्शस्य कार्यतावच्छेदकतया तथाविधेन बाध
जन्यानुमितौ व्यभिचाराभावेनानुमितौ व्याप्तिविषयताभ्युपगमस्यावश्यक इति वाच्यं ।। तथापि तेजस्त्वविशिष्टवह्निवि
धेयकानुमितिं प्रति तेजस्त्वविशिष्टवह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शस्य हेतुतायास्तथाविधेन बाधजन्यानु
मितौ व्यभिचारस्य दुर्वारत्वात् ।। तद्वारणार्थमाचार्यमते अनुमितौ व्याप्तिविषयतांगीकारः सयुक्तिक एवेति प्राहुः ।। य
त्तु । अनुमितौ व्याप्तिविशिष्टविषयत्वाभावेऽवच्छिन्नैनसंयोगसंसर्गघटितव्याप्त्येकतावगाहिभ्रमं संयोगसंसर्गकह

मवत्तावगाहिपरामर्शे धूमे संयोगसंबंधघटितवह्निव्यापकतावगाह्यवच्छिन्नसंयोगसंसर्गकत्वमवत्तावगाहिपरा-
मर्शयोः परस्परकार्यकारणभावेन तयोः परस्परजन्यानुमितौ व्यभिचारस्य दुर्वारत्वात्॥ तथाविधपरामर्शद्वयमेकाका-
रकप्रत्ययेन तद्विशेष्यकवह्निविधेयकावच्छिन्नसंयोगसंसर्गकानुमितेः कल्पनात्॥ न च धूमे संयोगादिसंसर्गघटितव्या-
पकतावगाह्यवच्छिन्नसंयोगादिसंसर्गकत्वमवत्तावगाहिपरामर्शादवच्छेदकावच्छेदेनानुमितेरुक्तरूपायास्तदन-
भ्युपगमान्नानुपपत्तिरिति वाच्यं॥ मिश्रैस्तस्मादप्यवच्छेदकावच्छेदेनानुमितेरुपगमात्तन्मते उपदर्शितदोषस्य दुर्वा-
रत्वात्॥ अत एवानुमितिलक्षणस्य अनुमितेरजन्यत्वपक्षे यदि च सल्लिंगपरामर्शादित्यादिग्रंथेन धुहसमवायघ-
टितगंधव्यापकतावगाहिगंधप्रागभावकालावच्छिन्नसमवायसंसर्गकपृथिवीत्वादिहेतुकगंधप्रागभावकालविशिष्ट-
घटविशेष्यकपरामर्शजन्यागंधप्रागभावकालावच्छिन्नसमवायसंसर्गकगंधविधेयकभ्रमात्मकानुमितावतिव्याप्तिवार-
णमपि दीधितौ संगच्छते॥ अन्यथा तुल्ययुक्त्या तादृशपरामर्शादप्यवच्छेदकावच्छेदेन तथाविधभ्रमानुमितेरनुदयात्तत्रा-
तिव्याप्तिवारणार्थिदीधितिकारस्य तथाप्रयासः प्रयास एव स्यादिति॥ न च धूमे संयोगावच्छिन्नसंयोगो संयोगत्वेन निवेश्य

वा·थ·
१५

तथाविधानुमितिंप्रतिउपरीक्षितपरामर्शयोरेकरूपेणाहेतुत्वान्नव्यभिचारोऽस्यावश्यकत्वाइतिवाच्यं अवच्छिन्नसंयोगसंबंधघटिता
प्रामाण्यग्रहकाले अवच्छिन्नसंयोगघटितव्यापकतावगाहिपरामर्शदशायामनुमित्यापत्तिवारणाय शुद्धसंयोगघटिता
प्रामाण्यग्रहकाले शुद्धसंयोगघटितव्यापकतावगाहिपरामर्शादनुमित्याप्तेर्वारणाय तथाविधाप्रामाण्यग्रहाना
मिकत्वेनेजकान्वेय्यकसंसर्गघटिताप्रामाण्यग्रहकाले अपरसंबंधघटितव्यापकतावगाहिपरामर्शादनुमितेरनुद
यप्रसंगेनतेषांविशिष्योत्तेजकत्वंस्वीकृत्यविशिष्य। तथाविधपरामर्शयोः कारणतावश्यकत्वात् तथापिविधदोष
स्यदुरुद्धरत्वात्। अनुमितौ व्याप्तिविषयतांगीकारेतु अवच्छिन्नसंयोगसंसर्गघटितव्यापकताघटितव्याप्त्यवगाहिपरा
मर्शस्य तथाविधव्याप्त्यवगाह्यनुमितिंप्रतिहेतुत्वकल्पनेन शुद्धसंयोगसंबंधघटितव्यापकताघटितव्याप्त्यवगाह्य
वच्छिन्नसंयोगसंसर्गकत्वमवगाहिपरामर्शस्य तथाविधव्याप्त्यवगाह्यनुमितिंप्रतिहेतुत्वंकल्पते। नचतयोः प
रस्परतज्जन्यानुमितौव्यभिचारइतिसिद्धमनुमितौव्याप्तिविषयकत्वमिति। तदनीवमंदे। शुद्धसंयोगघटितवह्निव्याप
कतावगाह्यवच्छिन्नसंयोगसंबंधघटितत्वमवगाहिपरामर्शात्संयोगत्वत्वावच्छेदकीभूतपर्वतत्ववलोभयंसंबं

रा·म·
२५

धेनपर्वतोहिस्वव्यापकवह्निविधेयकानुमितेरुत्पादाभ्युपगमात्तत्स्याप्येवमुक्तेत्रावच्छेदकावच्छेदेनानुमितेःस्वरूपत्वात्
।तत्रनावच्छिन्नसंयोगघटितवह्निव्यापकतावगाहिपरामर्शहेतुतायांव्यभिचारः।तेनावच्छिन्नसंयोगसंसर्गकवह्नि
विधेयकानुमितेरुत्पादात्तथाविधानुमितिंप्रतितस्यहेतुत्वात्।।नन्वाचार्यमतेपर्वतोवह्निमानित्यादिसिद्धेःप्रतिब
ध्यतावच्छेदकस्यदुर्वचत्वप्रसंगः।तथाहि।।तस्याःप्रतिबध्यतावच्छेदकंनपर्वतत्वावच्छिन्नविशेष्यकावह्निविधेयका
नुमितित्वंतथाविधसिद्धिकालेपिनपर्वतोवह्निमानित्यनुमितेरनुदयप्रसंगात्।नापिपर्वतत्वातिरिक्तधर्मानवच्छिन्न
विशेष्यतानिरूपितवह्नित्वविधेयताशाल्यनुमितित्वंतस्याःप्रतिबध्यतावच्छेदकंवह्निव्याप्यधूमवान्पर्वतइत्या
दिपरामर्शजन्यानुमितेरसंग्रहप्रसंगात्।।तस्याःपर्वतत्वातिरिक्तवह्निव्याप्यधूमावच्छिन्नविशेष्यतानिरूपितवह्निनिष्ठ
विधेयताशालित्वेनतत्प्रतिबध्यतावच्छेदकानाक्रान्तत्वात्।नापिवह्निव्याप्यधूमातिरिक्तपर्वतत्वातिरिक्तधर्मान
वच्छिन्नविशेष्यताहिनिरूपितवह्निनिष्ठविधेयताशाल्यनुमितित्वंतथाविधसिद्धिप्रतिबध्यतावच्छेदकंयाच्यं।तथा

वा०र्थ०
१६

सति पर्वतो वह्निमानित्यादिसिद्धिकाले वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यधूमवानित्यादिपरामर्शजन्य वह्निव्याप्यधूम
वान्पर्वतो वह्निमानित्याद्यनुमितेरनुत्पत्त्यापत्तिराचार्यमते तेन तत्र चिन्तामणिकारसंमतानुमितेरङ्गीकार्यत्वादिति चेन्मैवं
॥ आचार्यमते पर्वतो वह्निमानित्यादिसिद्धेः पर्वतत्वातिरिक्तधर्मानवच्छिन्नोद्देश्यतानिरूपितवह्निविधेयताशाल्यनुमि
तित्वावच्छिन्नं प्रति प्रतिबन्धकत्वाभ्युपगमात् वह्निव्याप्यधूमवान्पर्वत इत्यादिपरामर्शजन्यानुमितेस्तदुद्देश्यतावच्छेद
कत्वस्य च पर्वतत्व एवाङ्गीकारात् तस्याः न तत्प्रतिबध्यतावच्छेदकानाक्रान्तत्वप्रसङ्गः वह्निव्याप्यधूमवान्पर्वतो वह्नि
व्याप्यधूमवानित्यादिपरामर्शजन्यानुमितेस्तदुद्देश्यतावच्छेदकत्वस्य वह्निव्याप्यधूमेऽपि सत्त्वे न तस्या अपि न तथाविध
सिद्धिप्रतिबध्यतावच्छेदकनाक्रान्तत्वप्रसङ्गश्चेति आचार्यमतनिष्कर्षः। अत्र नैयायिकाः। वह्निव्याप्यधूमवान्पर्वत इ
त्यादिपरामर्शाद्वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितिस्वीकारे मानाभावः। न च तस्मात्तथाविधानुमितिस्वी
कारे अन्यलिङ्गकपरामर्शजन्यानुमितौ व्यभिचारवारणाय धूमपरामर्शजन्यतावच्छेदककोटावव्यवहितोत्तरत्वं नि

ग म०
१६

वेश्यत इति लाघवतर्कसहकृतमनुमानमेव प्रमाणमिति वाच्यं। अथ वह्नितो नरत्वादिसंबंधेन वह्निव्याप्यधूम
प्रकारकपर्वतविशेष्यकनिश्चयविशिष्टानुमितिं प्रति वह्निव्याप्यधूमप्रकारकपर्वतविशेष्यकनिश्चयस्य हेतु
त्वे कल्पनीये अनुमितित्वमनिवेश्य अथ वह्नितो न रक्षणोत्पत्तिकत्वादिसंबंधघटितसामानाधिकरण्यसंबंधे
न वह्निव्याप्यधूमप्रकारकनिश्चयविशिष्टयत्नज्ञानत्वेन रूपावच्छिन्नं प्रति वह्निव्याप्यधूमप्रकारकपर्वतविशेष्यक
निश्चयत्वेन हेतुत्वकल्पने पर्वतो वह्निव्याप्यधूमाभाववान् स्यादित्याद्यनित्वावच्छिन्नं प्रति। वह्निव्याप्यधूमवान् प
र्वत इत्याद्याकारकाव्याप्यव्यतिरेकनिर्णायकस्य सत्त्वात् गौरवाहेतुत्वाकल्पनेन चिंतामणिकारमते लाघवसंभवात्।
आचार्यमते तु तथाविधापत्तिं प्रति तथाविधापाद्यव्यतिरेकनिर्णायकस्य सत्त्वात् गौरवाहेतुत्वस्यावश्यकतया चिंता
मणिकारमतापेक्षया गौरवात्। वह्निव्याप्यधूमवान् पर्वत इत्यादिपरामर्शाद्वह्निव्याप्यधूमवान् पर्वतो वह्निमा
नित्यनुमितिस्वीकारेण निर्युक्तिक एव। अत एव घटादिप्रसक्तं प्रतिबद्धाभावानुमितिसामग्र्याः प्रतिबंधकता।

यांतरवच्छेदककोटौ वह्निव्याप्यधूमवान् पर्वत इत्यादितदभावव्याप्यवत्तानिर्णयाभावानिवेशप्रयुक्तलाघवस्यापि संभवः। न
च तत्प्रतिबंधकतावच्छेदककोटौ तस्यानिवेशे वह्निव्याप्यवत्तानिर्णयकालीनवह्न्यभाववानुमितिजनकपरामर्शदशाया
घटादिप्रत्यक्षोत्पत्तौ बाधकाभावेन तथाविधसामग्र्यभावस्य हेतुतायां व्यभिचारात्। तथाविधसामग्रीप्रतिबंधकतावच्छे
दककोटौ वह्निव्याप्यवत्तानिर्णयाभावनिवेश आवश्यक इति वाच्यं। तत्र व्यभिचारवारणाय तथाविधसामग्रीप्रति
बध्यतावच्छेदककोटौ स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वादिसंबंधेन वह्निव्याप्यवत्तानिर्णयविशिष्टोयस्तदन्यत्वस्य नि
वेशात् वह्निव्याप्यवत्तानिर्णयकाले वह्न्यभाववानुमितिजनकीभूतेतरकारणदशायां तादृशसामग्रीबलात् घटादिप्रत्य
क्षोत्पत्तिः। तथाविधनिर्णयाभावघटितवह्न्यभाववानुमितिसामग्रीकालेपि तादृशसामग्रीबलात् घटप्रत्यक्षापत्ति
रिति नाशंकनीयं॥ धूमपरामर्शाव्यवहितोत्तरक्षणोत्पत्तिकानुमितिं प्रति धूमपरामर्शस्य हेतुत्वे कल्पनीये स्वाव्य
वहितोत्तरक्षणोत्पत्तिकत्वादिसंबंधेन धूमपरामर्शविशिष्टं प्रति धूमपरामर्शस्य हेतुत्वकल्पनेन तथाविधनिर्णयाव्य

वह्नितोऽन्येऽसन्नघटादिप्रत्यक्षस्याधितत्कार्यतावच्छेदकाक्रांतं तत्र यात् तथाविधनिर्णयाभाव वह्नितोऽन्येऽसन्नघटादिप्रत्यक्ष
सामग्रीमध्ये तथाविधनिर्णयस्याधिनिवेशेन वह्निव्याप्यवत्तानिर्णयाभावादिघटितवह्न्यनुमितिसामग्रीदशायां तथावि
धनिर्णयादिघटितघटादिप्रत्यक्षसामग्र्यभावेन घटादिप्रत्यक्षापादनासंभवात्। आचार्यमते उपदर्शितसामग्रीप्रति
बंधकतायां वह्निव्याप्यवत्तानिर्णयाभावमनिवेश्य व्यभिचारवारणार्थं तत्प्रतिबध्यतावच्छेदककोटौ तादृशनिर्णयवि
शिष्टान्यत्वस्य निवेशे उपदर्शितान्यत्रिरीतिप्रतिबध्यतावच्छेदककोटौ तथाविधनिर्णयवैशिष्ट्यमनिवेश्य घटादिप्र
त्यक्षं प्रति तथाविधनिर्णयाभावं निवेश्य वह्न्यभावानुमितिसामग्र्याः प्रतिबंधकत्वकल्पने तेन सहैतत्कारणानां विशे
षणविशेष्यभावे विनिगमनाविरहेण सामग्रीप्रतिबंधकतावाहुल्यप्रयुक्तगौरवस्य गीर्वाणगुरोरपि दुःसमाधेयत्वा
दिति। केचित्तु॥ आचार्यमतेऽपि व्यभिचारवारणार्थं धूमपरामर्शजन्यतावच्छेदककोटौ धूमपरामर्शान्यवह्नितोऽन्यत्व
निवेशनस्यावश्यकतया प्रक्लितं धूमपरामर्शजन्यतावच्छेदककोटौ वह्नितोऽन्यत्वानिवेशनप्रयुक्तलाघवेन। तथाहि।

आचार्यमते पर्वतीयत्वदर्शितपर्वतनिष्ठविशेष्यतानिरूपितवह्निनिष्ठविधेयताशाल्यनुमितिं प्रति पर्वतत्वावच्छिन्नविशेष्यतानिरूपित
।वह्निव्याप्यधूमप्रकारताशालिनिर्णयत्वेन हेतुत्वं वक्तव्यं तन्निर्णयत्वं न पर्वतत्वावच्छिन्नविशेष्यतानिरूपितधूमाभावप्रकार
ताशून्यत्वे सति वह्निव्याप्यधूमप्रकारताशालिज्ञानत्वं। तथा सति नीलपर्वतो वह्निव्याप्यधूमाभाववान् पर्वतो वह्निव्याप्य
धूमवांश्चेति समूहालंबनादनुमित्यनुदयप्रसंगात्। न च पर्वतत्वातिरिक्तधर्मानवच्छिन्नविशेष्यतानिरूपितधूमाभावप्र
कारताशून्यत्वे सति तादृशधूमप्रकारताशालिज्ञानत्वमेव निर्णयत्वे वाच्यं। तथा सति नीलपर्वतो वह्निव्याप्यधूमवांश्चे
ति संशयात् पर्वतो वह्निमानित्यनुमित्यापत्तेरिति शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितधूमाभावादिप्रकारताशून्यत्वे
सति शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपिततथाविधधूमप्रकारताशालिज्ञानत्वमेव तथाविधनिर्णयत्वं वक्तव्यं। त
था च वह्निव्याप्यधूमवान् नीलश्च पर्वत इत्याहार्यपरामर्शदशायां नीलो वह्न्यभाववानित्यादिबाधबुद्धिसत्त्वे वह्निव्याप्यधूमवान् पर्व
तो वह्निमानित्यनुमित्यसत्त्वात् तत्र शुद्धपर्वतत्वावच्छिन्नविशेष्यतानिरूपितत्वमपरामर्शहेतुतायां व्यभिचार इति तद्वारणार्थं धूम

परामर्शजन्यतावच्छेदककोटावपि धूमपरामर्शाव्यवहितोत्तरत्वमवश्यं निवेशनीयमाचार्यमतेऽपीति। न च तदा तथाविधानुमि
तेरनभ्युपगमेऽस्तीति विरह इति वाच्यं। तत्र तथाविधानुमित्यभ्युपगमे घटादिप्रत्यक्षं प्रति नीलपर्वतत्वावच्छिन्नविशेष्यकव
ह्निविधेयकानुमितिसामग्री प्रतिबंधकतायां तद्वह्न्यवच्छेदककोटौ नीलो वह्न्यभाववानित्यादिबाधाभावनिवेशनस्यावश्यक
तया तेन सह तद्घटकीभूतेतरकारणानां विशेष्यविशेषणभावे विगमनाविरहात् तथाविधसामग्रीप्रतिबध्यप्रतिबंधक
भाववादतुल्यस्याप्यावश्यकत्वे न गौरवप्रसंगात्। तथाविधप्रतिबंधकतावच्छेदककोटौ तादृशबाधाभावनिवेशावश्यकत्वं तु तथाविध
बाधकालीननीलपर्वतो वह्निव्याप्यधूमवानित्यादिपरामर्शादिघटिततथाविधानुमितीतरकारणघटितसामग्रीदशायां भव
न्मतेऽनुमितेरनुदयेन भिन्नविषयकप्रत्यक्षस्येवोत्पत्त्या तत्र व्यभिचारवारणार्थमुपदर्शितस्थले तथाविधानुमित्यभ्युपगमे तु
तथाविधबाधकालीनोपदर्शितसामग्रीदशायामनुमितेरुत्पत्त्या भिन्नविषयकप्रत्यक्षोत्पत्त्यसम्भवेन व्यभिचाराभावात् तादृश
सामग्रीप्रतिबंधकतावच्छेदककोटौ नीलो वह्न्यभाववानित्यादिबाधाभावानिवेशेन लाघवं स्यादेव तादृशबाधकालेऽनुमित्यभ्युप

गमएवोचितइतिनचतथाविधानुमितिंप्रतिवह्निव्याप्यधूमप्रकारतानिरूपितशुद्धपर्वतत्वावच्छिन्नविशेष्यताशालिनिश्चयत्वेनहेतुत्व
स्यक्लृप्ततयातद्रूपतथाविधकारणाभावात्कथंतादृशानुमित्युत्पत्तिरितिवाच्यं॥पीतपर्वतोद्देश्यकवह्निविधेयकानुमितेर्व्यभिचारवा
रणायनीलपर्वतत्वावच्छिन्नविशेष्यताकवह्निव्याप्यधूमप्रकारकनिर्णयजन्यतावच्छेदककोटौनीलातिरिक्तपर्वतत्वातिरिक्तव
ह्निव्याप्यधूमातिरिक्तधर्मानवच्छिन्नविशेष्यतायाअवश्यंनिवेशनीयतयावह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितेरपिवह्नि
व्याप्यधूमवान्नीलपर्वतइत्यादिपरामर्शजन्यतावच्छेदकाक्रांततयोपदर्शितबाधकालेवह्निव्याप्यधूमवान्नीलपर्वतइतिपरा
मर्शबलादेवतथाविधानुमित्युत्पत्तिसंभवात्॥नचनीलपर्वतविशेष्यकवह्निव्याप्यधूमप्रकारकपरामर्शजन्यतावच्छेदककौ
टौविशेष्यतायांनीलपर्वतत्वावच्छिन्नत्वस्यापिनिवेशात्तद्बलादुपदर्शितानुमित्युत्पत्तिसंभवइतिवाच्यं॥तस्यतत्कार्य
तावच्छेदककोटौनिवेशप्रयोजनाभावात्॥नचैवंवह्निव्याप्यधूमवान्पर्वतइतिपरामर्शजन्यानुमितौव्यभिचारवारणायतज्जन्य
तावच्छेदककोटौतस्यनिवेशनमावश्यकमितिवाच्यं॥तादृशपरामर्शजन्यतावच्छेदककोटौतादृशपरामर्शाव्यवहितोत्तरत्वनिवे

शनेनैव व्यभिचारवारणासंभवात्॥ न चैवं मतिगौरवावकाश इति वाच्यं॥ उपदर्शितं सामग्री प्रतिबध्य प्रतिबंधकभावकल्पना
वाहुल्यप्रयुक्तगौरवापेक्षया एतादृशगौरवस्य स्वल्पत्वात्॥ ननु तथाविधवाधकाले उपदर्शितानुमितित्वाकोरेपि वह्निव्या
प्यधूमवान्नीलपर्वत इत्यादिपरामर्शघटितसामग्रीप्रतिबंधकतावच्छेदककोटौ तथाविधवाधाभावनिवेशस्यावश्यकः
।न्म न्यथा नीलो न वह्निमानित्यादिवाधकाले पर्वतो वह्निमानिति सिद्धिसत्वे वह्निव्याप्यधूमवान्नीलपर्वत इत्यादिपरामर्शद
शायां कस्याश्चिदप्यनुमितेरनुदयेन घटादिप्रत्यक्षोसमानतु त्सत्वापत्तेः॥ तथा च तथाविधवाधकाले तथाविधसिध्यसत्वे
तादृशपरामर्शदशायां घटादिप्रत्यक्षापत्तिवारणाय तथाविधवाधाभावमनिवेश्य पर्वतो वह्निमानिति सिध्यभावं निवेश्य व
ह्निव्याप्यधूमवान्नीलपर्वत इत्यादिपरामर्शघटितसामग्र्याः प्रतिबंधकत्वं घटादिप्रत्यक्षं प्रति कल्प्यं न तु पुनरुक्तहानीमुपद
र्शितानुसंगीकर्त्तव्येऽधिकमिति महागौरवावकाश इति चेत्॥ तदानी वह्निव्याप्यधूमवान्नीलपर्वत इत्यादिपरामर्शा
न्तथाविधानुमित्यभ्युपगमे वह्निव्याप्यवा धूमभाववन्नीलो नीलकाली नधूमवन्नीलपर्वतवान्पर्वत इत्यादिपरामर्शत्वेन हेतु

त्वं वह्निविधेयकानुमितिं प्रति न कल्पनेति तदानीं तत्र वह्निव्याप्यधूमप्रकारकनीलपर्वततलावच्छिन्नविशेष्यकपरामर्शस्यावश्य
कतया न तल्लाद्वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितिस्तस्याः पर्वते वह्निमनुमिनोमीत्यनुव्यवसायोपपत्तेः॥ वह्निव्या
प्यधूमवान्नीलपर्वत इत्यादिपरामर्शस्य फलजनने तथाविधव्याप्त्यभावस्य सहकारित्वं स्वीकृत्य तथाविधबाधकालीनत
थाविधपरामर्शदशायां पदर्शितानुमित्यनभ्युपगमे तु वह्निव्याप्यवद्भाववन्नीलकालीनत्वविशिष्टतथाविधनीलप
र्वतप्रकारकस्य तु पर्वततलावच्छिन्नविशेष्यकपरामर्शोत्तरं पर्वते वह्निमनुमिनोमीत्यनुव्यवसायनिर्वाहार्थं तस्मात्पर्वतोद्देश्य
कवह्निविधेयकानुमितेरुत्पादस्यावश्यकतया पर्वतोद्देश्यकवह्निविधेयकानुमितिं प्रति तथाविधपरामर्शस्य स्वातन्त्र्येण
हेतुत्वकल्पनं घटादिप्रत्यक्षं प्रति तथाविधपरामर्शादिघटितानुमितिसामग्र्याः स्वातन्त्र्येण प्रतिबन्धकत्वकल्पने चाधिकामि
तिमहागौरवापत्तेः॥ तस्मात्तथाविधबाधकाले वह्निव्याप्यधूमवान्नीलपर्वत इति परामर्शदशायां वह्निव्याप्यधूमवान्पर्व
तो वह्निमानित्यनुमितिरेकाकारस्य समयुक्तिकतया न तत्र तथाविधानुमितिं प्रति नीलपर्वततलावच्छिन्नविशेष्यकवह्निव्याप्यधूमप्रका

रकपरामर्शहेतुतापत्त्यभिचारवारणार्थं तन्मूल्यतावच्छेदककोटौ नवैद्यवह्निनोत्तरत्वनिवेशस्यावश्यकतया लाघवान्नको
शेनाचार्यमते तथाविधपरामर्शाद्वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितेरभ्युपगमो निर्युक्तिक एवेत्याहुः ॥ तदस
त् ॥ वह्निव्याप्यवत्त्वाभाववन्नीलकालीनवह्निव्याप्यधूमवन्नीलपर्वतवान्पर्वत इत्याकारकपरामर्शस्य वह्निव्याप्यवत्त्वाभाव
वन्नीलकालीनवह्निव्याप्यधूमवन्नीलपर्वतवान्पर्वतो वह्निमानित्यनुमितिं प्रति स्वातन्त्र्येण हेतुत्वकल्पने वह्निव्याप्यव
त्त्वाभावविशिष्टधूमवत्कालीनवह्निव्याप्यवत्त्वाभाववन्नीलकालीनवह्निव्याप्यधूमवन्नीलपर्वतवान्पर्वत इति परामर्शस्य
स्वातन्त्र्येणानुमितिं प्रति हेतुताकल्पने प्रयुक्तलाघवमस्तु तामेव ॥ तदानीं वह्निव्याप्यवत्त्वाभाववन्नीलकालीनवह्निव्याप्य
धूमवन्नीलपर्वतप्रकारकस्य पर्वतत्वावच्छिन्नविशेष्यकपरामर्शस्यावश्यकतया तद्दशायां वह्निव्याप्यवत्त्वाभाववन्नी
लकालीनवह्निव्याप्यधूमवन्नीलपर्वतवान्पर्वतो वह्निमानित्यनुमित्युत्पत्तौ तदा पर्वते वह्निमनुमिनोमीत्यनुव्यवसाया
दिनि वह्निमत्त्वानुमितिं प्रति पूर्वोपदर्शितपरामर्शस्य स्वातन्त्र्येण हेतुत्वकल्पने प्रयोजनाभावात् तदानीं वह्निव्याप्यधूमप्रका

रकनीलपर्वतविशेष्यकपरामर्शबलाद्वह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितिरपिस्यादितिनसंभवद्युक्तिकापितथाविधानुमि
तिप्रतिबंधकीभूतधूमधर्मितावच्छेदककचत्वाभावप्रकारकबाधबुद्धेस्तदामसत्त्वादिति॥ एवंघटादिप्रत्यक्षंप्रतिवह्निव्याप्यवत्त्वा
भाववन्नीलकालीनवह्निव्याप्यधूमवन्नीलपर्वतप्रकारकपर्वतविशेष्यकपरामर्शादिघटितसामग्र्याः पृथक्प्रतिबंधकत्वक
ल्पनेऽपरदर्शितपरामर्शादिघटितसामग्र्याघटादिप्रत्यक्षंप्रतिपृथक्प्रतिबंधकत्वाकल्पनप्रयुक्तलाघवमपिसंभवतितथा
विधपरामर्शकालेवह्निव्याप्यवत्त्वाभाववन्नीलसकालीनवह्निव्याप्यधूमवन्नीलपर्वतइत्याकारकपरामर्शादिघटितसाम
ग्र्या आवश्यकत्वात्तद्बलादेवतदानींघटादिप्रत्यक्षासंभवोपपत्तेः। तथाचनीलोवह्न्यभाववानितिसद्बाधकालीनवह्निव्याप्य
धूमवान्नीलपर्वतइत्यादिपरामर्शदशायांवह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितिस्वीकारेलाघवबाधाभावात्तद्घटा
दिप्रत्यक्षंप्रतिपर्वतोवह्निमानित्यादिमध्यभावघटितवह्निव्याप्यधूमप्रकारकनीलपर्वतविशेष्यकपरामर्शादिघटितसा
मग्र्याअतिरिक्तप्रतिबध्यप्रतिबंधकभावकल्पनप्रयुक्तगौरवंपुनरधिकं। तथाविधबाधकालीनपरामर्शजन्यतावच्छेदकको

टौतद्रूपवह्निमत्त्वस्यानिवेशश्चावश्यक इत्यलं जीर्णोपलालनेनयमोना। यत्तु आचार्यमते धूमपरामर्शात् वह्निव्या
प्यधूमवान्पर्वतो वह्निमानित्यनुमितिस्वीकारो विशिष्टवैशिष्ट्यमिति रीत्या वह्निव्याप्यधूमपर्वतत्वोभयधर्मितावच्छेदकी
कृत्यवह्निव्याप्यधूमप्रकारकस्य वह्निव्याप्यधूमवत्पर्वतो वह्निव्याप्यधूमवानित्याकारकपरामर्शस्य वह्निव्याप्यधूमवत्प
र्वतविशेष्यकवह्निविधेयकानुमितिं प्रति स्वातंत्र्येण हेतुताकल्पनेन लाघवसंभवः न तु धूमवत्पर्वतत्वधर्मितावच्छेद
कीकृत्यवह्निव्याप्यधूमप्रकारकपरामर्शत्वस्यावश्यकतया नहुत्वादेव तत्र तन्मते वह्निव्याप्यधूमवान्पर्वतो वह्निमानि
त्यनुमितिनिर्वाहात् तत्तदाचार्यमते चिंतामणिकारसंमतानुमितेरभ्युपगमक्षतिविरहादिति॥ तदपि न॥ वह्निव्याप्यधू
मवान्पर्वतो वह्निव्याप्यधूमवान्वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यधूमाभावाभाववानित्यादिनानाविधाया व्यतिरे
कनिर्णयानां हेतुत्वकल्पने तेषां परस्परव्यभिचारवारणाय एवं प्रसंगेकं तथाविधनानाविधायाद्यव्यतिरेकनिर्णयजन्य
तावच्छेदककोटिप्रवेशकं तथाविधायाव्यतिरेकनिर्णयवैशिष्ट्यमव्यवहितोत्तरत्वसंबंधेनावश्यं निवेशनीयं। एवं च

वा.र्थ.
१२

तथाच वह्नितो न रलसंबंधेन च वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यधूमवानिति निर्णयविशिष्टापत्तिं प्रति तथाविधनिर्णयस्य
हेतुत्वं कल्पनीये तत्रैवापत्तित्वमनिवेश्य प्रसाध्यवह्नितो नरत्वादिसंबंधेन तथाविधनिर्णयविशिष्टत्वस्यानुमितिसाधारण्यात्
धर्मस्य तादृशनिर्णयकार्यतावच्छेदकत्वकल्पनात्तेनैवोपदर्शितपरामर्शात्तथाविधानुमितिनिर्वाहे चिंतामणिकारेणा
पि वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितिं प्रति वह्निव्याप्यधूमवान्पर्वतो वह्निव्याप्यधूमवानित्यादिपरामर्शस्य स्वातं
त्र्येण हेतुत्वं न कल्प्यत इति चिंतामणिकारमतानपेक्षया आचार्यमते कथं तादृशवाक्याज्जनितानुमितिः । एतेनाचार्यमते
धूमपरामर्शाद्वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितिर्वाकारेऽनुमितिं प्रति धूमपरामर्शस्य स्वातंत्र्येण हेतुत्वं
न कल्प्यते तन्मते धूमपरामर्शजन्यानुमितेर्वह्निव्याप्यधूमवत्पर्वतत्वविशिष्टे वह्निवैशिष्ट्यावगाहित्वं न यावविशिष्टमिति
तथाविधधर्मशालिनिष्ठप्रकारतानिरूपितविशेष्यतानवच्छेदकप्रकारकनिर्णयहेतुतयैव निर्वाहात् । चिंतामणिकारमते तु पर्वतो
वह्निमानित्यनुमितिर्वह्निव्याप्यधूमवत्पर्वतत्वविशिष्टे वह्निवैशिष्ट्यानवगाहितया ऽनुमितिं प्रति परामर्शहेतुत्वस्य

राम.
१२

वविशिष्टवैशिष्ट्यघटितधीविशेष्यतावच्छेदकप्रकारकनिश्चयहेतुतया निर्वाहात्तत्रावश्यं धूमपरामर्शस्य
ला तं स्मरणाहेतुत्वकल्पनमिति गौरवं दुःपरिहरमेवेत्यपि परास्तं व्याप्तिं प्रति व्याप्यव्यतिरेकनिश्चयहेतुत्वेन
तन्निर्वाहात् ॥ स्तु ॥ अथावायमते धूमपरामर्शाद्वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमित्यनंगीकारे वह्निव्याप्या
लोकवान्पर्वत इत्यादिपरामर्शकाले वह्निव्याप्यधूमवत्पर्वतात्मोवद्धभाववानित्यादीनत्वाधदृशापां वह्निव्या
प्यालोकवान् वह्निव्याप्यधूमवान्पर्वतो वह्निमानित्यनुमितेरानुभविकत्वात् तथा न हृत्य समर्थनं यथाविधेन तत्त्वाधह्य
त्वांशे मेगाहेतुत्वं न कल्प्यते तन्मते तन्न हाम्बु हपर्वतत्वधर्मितावच्छेदकीकृत्य च वह्निव्याप्यधूमप्रकारकपरामर्श
स्यावश्यकतया तत्त्वात्तदानीं वह्निव्याप्यधूमवत्पर्वतत्वधर्मितावच्छेदकीकृत्य च वह्निविधेयकानुमित्यानिर्वाहा
त् । चिंतामणिकारमते तु वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नविशेष्यकानुमितेः स्वरूपपर्वतत्वावच्छिन्नविशेष्यकत्वे
हि व्याप्यधूमपरामर्शकार्यतावच्छेदकानाक्रान्ततया तत्त्वात्तत्र तथाविधानुमितिनिर्वाहाभावेन न व्याप्तिधिया

नुमितिप्रतितथाविधेनरवाधस्यस्वातंत्र्येणहेतुत्वकल्पनमावश्यकमितिचिंतामणिकारमतस्यैवगुरुत्वमितितन्नी
वंमहं॥तथाविधानुमितिंप्रतितथाविधेनवाधस्यहेतुत्वमपिवह्निव्याप्यधूमवत्सर्वतान्योवह्निमानस्त्वितिसापत्तिंप्रति
वन्हिव्याप्यधूमवत्सर्वतान्योवधूमावच्चानिसाधाधाधव्यतिरेकनिर्णयेहेतुतयैवोपदर्शितेतीसानिर्वाहेणाचिंता
मणिकारमतेपितथाविधस्थलेतत्रकार्यकारणाभावकल्पनागौरवाभावादिति॥यत्तुचिंतामणिकारमतेधूमपरा
मर्शात्पर्वतोवह्निमानित्यनुमितिस्साकापर्वतोवह्निमानितिनसिद्धेःप्रतिबंधकत्वेगौरवं॥आचार्यमतेतुसमानप्रकार
कसिद्धेरेवानुमितिप्रतिबंधकत्वेपर्वतोवह्निमानितिसिद्धेर्धूमपरामर्शजन्यानुमितेर्भिन्नविषयकत्वात्समानाका
रत्वाभावेनतथाविधाविनुमितेरप्रतिबंधकतयातथाकल्पनानावश्यकत्वात्लाघवमिति॥तदसत्।आचार्यमतेत
थाविधसिद्धेस्सत्यनुमितिन्नूनविषयकत्वेप्यनुभवबलाद्धूमपरामर्शजन्यानुमितिप्रतिबंधकत्वमास्थीयते।अन्य
थातन्मतेपक्षतावच्छेदकस्यहेतुतानवीकारस्यनिरर्थकत्वापात्तात्।तथाहि।रत्नकोशस्याप्यगंधवतीसाकारकपरामर्शोगंधवेर्

धाधिकरणात्वस्याभावप्रतियोगितानवच्छेदकेन तदभेदत्वावच्छिन्नाधिकरणवृत्तित्वभानदशायां इत्यत्रैवेदोपि गंधविका
रणाभासतेनतयोस्तुल्यविनिवेशत्वात्॥ तथा च पक्षतावच्छेदकस्य हेतुत्वेन तथाविधपरामर्शदशायां सिद्धिसत्त्वस्यावश्यक
त्वात् अनुमितेरुत्पादासंभव एव पक्षतावच्छेदकस्य हेतुत्वस्य हेतुत्वेन तथाविधपरामर्शदशायां सिद्धिसत्त्वस्यावश्य
कत्वात् अनुमितेरुत्पादासंभव एव पक्षतावच्छेदकस्य हेतुत्वानंगीकारे बीजं। ननु आचार्यमते अनुमितिसमाना
कारतया तथाविधसिद्धेस्तत्राप्रतिबंधकत्वे उपपादेपि तु तदंशे अभिमतानुभवबलात्तन्मते उपदर्शितसिद्धेः प्रतिबं
धकत्वमवश्यमंगीकार्यमिति कृत्स्नाश्चवावकाशः। किं च तु। आचार्यमते धूमपरामर्शजन्यानुमितौ पर्वतो वह्निमा
निति सिद्धेः प्रतिबंधकत्वे अनुमितिं प्रति विशिष्टवैशिष्ट्यप्रत्यक्षेच्छाविशिष्टवह्निमत्पर्वतवान् देश इत्याकारविशिष्टवै
शिष्ट्यबोधात्मकसामग्र्याः प्रतिबंधकत्वकल्पनमावश्यकं। अन्यथा तादृशप्रत्यक्षसामग्रीकाले पर्वतो वह्निमानि
त्यनुमितेर्वारणासंभवात् तथाविधसिद्धेस्तत्र प्रतिबंधकत्वे तु उपदर्शितविशिष्टवैशिष्ट्यबोधात्मकप्रत्यक्षसाम

बा·थे·
२५

श्रीकालेपर्वतोवह्निमानितिसिद्धेर्विशेषणावच्छेदकप्रकारकनिर्णयविधयाआवश्यकतयानहलादेवतत्रानुमित्सनुसहितेनिवार्य
ऽनुमितिंप्रतितथाविधसामग्याः प्रतिवंधकत्वंनकल्पवनइतिलाघवबलात्तथाविधसिद्धेर्हेतुपरामर्शोत्तरमनुमितेरसमा
नाकारत्वेपितत्रप्रतिवंधकत्वकल्पनमावश्यकं॥आध्यानुमितिंप्रतितथाविधसिद्धेः प्रतिवंधकत्वेवह्निव्याप्यधूमवत्पर्वतत्वा
मयंधर्मितावच्छेदकोक्तत्पवह्निव्याप्यधूमप्रकारकवह्निव्याप्यधूमवान्पर्वतोवह्निव्याप्यधूमवानित्याकारकपरामर्शघटि
तानुमितिसामग्याः भिन्नविषयकप्रत्यक्षंप्रतिप्रतिवंधकत्वकल्पनेगौरवं॥तथाहि॥पर्वतोवह्निमानितिसिद्धिकालेतथावि
धपरामर्शकालेऽनुमितेरुत्पत्तिप्रसक्त्यानुत्पादेनतथाविधसिध्यभावमनिवेश्यवह्निव्याप्यधूमवान्पर्वतोवह्निमानि
तिसिध्यभावंनिवेश्यतथाविधपरामर्शादिघटितसामग्याः प्रतिवंधकत्वांतरमवश्यंकल्पनीयं॥अन्यथाशुद्धपर्वतत्वा
वच्छिन्नविशेषकवह्निव्याप्यधूमप्रकारकपरामर्शघटितसामग्याः पर्वतोवह्निमानितिसिध्यभावघटितायास्तदानत्रासत्वे
नभिन्नविषयकप्रत्यक्षोत्पादायत्नेदुर्वारत्वात्तथाविधसामग्रीप्रतिवंधकतयाअनिर्वाहात्।नचशुद्धपर्वतत्वावच्छिन्नविशेष्य

रामः
२५

कवह्निव्याप्यधूमप्रकारकपरामर्शादिघटितसामग्रीप्रतिबंधकतावच्छेदककोटौ पर्वतो वह्निमानितिसिध्यभाववनिवेशोप्रयोज
नाभावात्तथैवोपदर्शितविशिष्टधर्मिकपरामर्शादिघटितानुमितिसामग्रीकाले प्रत्यक्षवारणासंभवात्तथाविधविशिष्ट
धर्मिकपरामर्शादिघटितसामग्र्याः स्वतंत्रप्रतिबंधकत्वकल्पनमितिवाच्यं॥ स्तुह पर्वतत्वावच्छिन्नविशेष्यकवह्निव्याप्य
धूमप्रकारकपरामर्शादिघटितसामग्रीप्रतिबंधकतावच्छेदककोटौ पर्वतो वह्निमानितिसिध्यभाववनिवेशे तथाविधसि
द्धिकाले नानुमितीतरकारणासत्वे भिन्नविषयकप्रत्यक्षानुत्पत्त्यापत्तेः॥ तथा चानंतघटपटादिविषयकप्रत्यक्षं प्रति
उपदर्शितविशिष्टधर्मिकवह्निव्याप्यधूमप्रकारकपरामर्शादिघटितानुमितिसामग्र्या अनंतप्रतिबध्यप्रतिबंधकभाव
कल्पनाया गुरुतरगौरवं दुःपरिहरमेव॥ तथाविधसिद्धेरनुमित्सप्रतिबंधकत्वे तु वह्निव्याप्यधूमवान् पर्वत इति परामर्शक
ले पर्वतो वह्निमानिति सिद्धिसत्वेप्यनुमितेरेवोत्पत्त्या प्रत्यक्षानुत्पादेन वह्निव्याप्यधूमवान् पर्वत इति परामर्शादिघटित
सामग्र्या पर्वतो वह्निमानिति सिध्यभावाघटिताया एव भिन्नविषयकप्रत्यक्षं प्रति प्रतिबंधकतायाः कल्पनीयतया तथैव व

वा॰थ्यै॰
२५

ह्निव्याप्यधूमवान्पर्वतोवह्निव्याप्यधूमवानित्यादिपरामर्शकालेभिन्नविषयकप्रत्यक्षायहिवारणार्थासंभवेनभिन्नविषयकप्रत्यक्षासंप्रति
तथाविधपरामर्शादिघटितानुमितिसामग्र्याःस्वतंत्रप्रतिबंधकत्वाकल्पनप्रयुक्तलाघवस्यदुर्वारत्वादितिआचार्यमतेवह्निव्या
प्यधूमवान्पर्वतोवह्निमानित्यनुमितिंप्रतिपर्वतोवह्निमानित्यादिसिद्धेःप्रतिबंधकत्वेउपदर्शितकतिपयलाघवसंभवेपिबहुवि
धदर्शितगौरवेणतथाविधानुमितिंप्रतितस्याःप्रतिबंधकत्वाकल्पनमेवसम्यगितिचेन्न।वह्निव्याप्यधूमवान्पर्वतोवह्निव्याप्यधू
मवानितिपरामर्शकालेवह्निव्याप्यधूमवान्पर्वतोवह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यादिसिद्धिसत्त्वेवह्निव्याप्यधूमनिष्ठप्रका
रतानिरूपितपर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमनिष्ठप्रकारताशालिपरामर्शजन्यानुमितिर्जायमानाभिमतोच्छाद
शांशेघटपटादिप्रत्यक्षवारणायघटपटादिप्रत्यक्षंप्रतितथाविधेच्छाविरहविशिष्टतादृशसिद्ध्यभावघटितवह्निव्याप्यधूमवा
न्पर्वतोवह्निव्याप्यधूमवानित्यादिपरामर्शघटितानुमितिसामग्र्याःप्रतिबंधकत्ववह्निव्याप्यधूमवान्पर्वतोवह्निव्याप्यधूमवा
न्पर्वतोवह्निमानित्यनुमितिंप्रतिपर्वतोवह्निमानितिसिद्धेःप्रतिबंधकत्वादिनाअवश्यंकल्पनीयं।वह्निव्याप्यधूमवान्पर्वतोवह्नि

राम॰
२५

मानितिसिद्धेःप्रतिबंधकत्वमादिनाप्यनाश्रयंकल्पनीयं॥वह्निव्याप्यधूमवान्पर्वतइत्यादिपरामर्शकालेउपदर्शितेच्छा
कालीनवह्निव्याप्यधूमवान्पर्वतोवह्निमानितिसिद्धित्वेघटपटादिसक्षोत्पत्तेरनुपपत्त्यातथाविधेच्छाविरहविशिष्टतादृ
शसिध्यभावस्यवह्निव्याप्यधूमवान्पर्वतइतिपरामर्शादिघटितसामग्रीप्रतिबंधकतावच्छेदककोटौनिवेशासंभवात्॥
तथाचोपदर्शितगौरवासंभवान्नाचार्यमतेऽनुमितिंप्रतिपर्वतोवह्निमानितिसिद्धेःप्रतिबंधकतादर्शितलाघवेननिवा
रयितुमशक्येति॥नचतथापिनिरुक्तविषयकप्रत्यक्षंप्रतिवह्निव्याप्यधूमवान्पर्वतइत्यादिपरामर्शघटितसामग्र्याःपर्व
तोवह्निमानित्यादिसिध्यभावविशिष्टायाःप्रतिबंधकत्वकल्पनेगौरवमितिवाच्यं॥तादृशसामग्रीमध्येतथाविधसिध्य
भावनिवेशेउपदर्शितविशिष्टवैशिष्ट्यबोधात्मकप्रत्यक्षाविशिष्टतथाविधप्रत्यक्षसामग्र्याःअनुमितत्वाभावविशिष्टा
याअभावनिवेशनलाघवसंभवात्॥तस्माद्वह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितिंप्रतिपर्वतोवह्निमानित्यादि
सिद्धेस्तत्तन्नविषयकत्वेपिप्रतिबंधकत्वकल्पनमावश्यकमित्युपदर्शितयुक्त्याध्यवसेयमित्याहुः॥तत्रविचारोयं॥न

थाहि॥आचार्यमतेवह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितिंप्रतिपर्वतोवह्निमानितिसिद्धेःप्रतिवंधकल्पनेपिपर्वतोवह्नि
मानितिअनुमितिंप्रतिविशिष्टवैशिष्ट्यबोधेच्छाविशिष्टानुमितित्वप्रकारकेच्छाभाववविशिष्टवह्निमत्पर्वतवान्देशइत्यादि
विशिष्टवैशिष्ट्यप्रत्यक्षात्मकसामग्र्याःप्रतिवंधकत्वकल्पनमावश्यकं॥अन्यथापर्वतोवह्निमानितिविशेषणताव
च्छेदकप्रकारकनिर्णयादिघटिततथाविधविशिष्टमिथ्याभावघटितानुमितिसामग्रीबलादनुमितेर्वारणासंभवात्॥न
चतथाविधानुमितिंप्रतिअनुमितित्वप्रकारकेच्छाभाववविशिष्टपर्वतोवह्निमानितिसिद्धेःप्रतिवंधकत्वकल्पनात्रोक्तदो
षइतिवाच्यं॥तथासतिपर्वतोवह्निमानितिसिद्धिसत्वेपर्वतविशेष्यकवह्निज्ञानंजायतामितीच्छासत्वेतथाविधानुमि
त्यनुपपत्तेः।एवंचोपदर्शितायुक्तिभियाअनुमितित्वप्रकारकेच्छाभावविशिष्टयाविशिष्टवैशिष्ट्याप्रत्यक्षसामग्र्याःप
र्वतोवह्निमानितिअनुमितिंप्रतिप्रतिवंधकत्वकल्पनस्यावश्यकत्वेदर्शितदिशाचाचार्यमतेतथाविधानुमितिंप्र
तिपर्वतोवह्निमानितिसिद्धेःप्रतिवंधकत्वकल्पनेयुक्तिर्नसाधीयसीति॥केचित्तु॥वह्निव्याप्यधूमवान्पर्वतइतिपरामर्श

वलाद्वह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितिस्वीकारेधूमलिंगकानुमित्याविरहविशिष्टपर्वतोवह्निमानितिसिध्य
भावस्यकार्यतावछेदकंयदिपर्वतोद्देश्यकवह्निविधेयकानुमितित्वंतदाऽऽलोकलिंगकेछाकालानपर्वतोवह्निमा
नितिसिद्धिदशायांआलोकपरामर्शात्तथाविधानुमितेरुत्पादेनव्यभिचारवारणमशक्यमितिस्वाव्यवहितोत्तरक्षणो
त्पत्तिकत्वसमानाधिकरणयोभयसंबंधेनधूमपरामर्शवैशिष्ट्यमवश्यंतथाविधसिध्यभावकार्यतावछेदककोटौनिवे
शनीयंतथाचतन्मतेऽव्यवहितोत्तरत्वादिनिवेशप्रयुक्तगौरवंदुःपरिहरमेव॥आचार्यमतेतुधूमलिंगकेछाविरहविशि
ष्टतथाविधसिध्यभावस्यकार्यतावछेदकंवह्निव्याप्यधूमवान्पर्वतोवह्निमानित्यनुमितित्वमितिकार्यतावछेदकलाघ
वमस्तुमेंगांव॥नव्याचार्यमतेतथाविधसिध्यभावस्यतथाविधकार्यतावछेदकत्वेपर्वतोवह्निमानितिसिद्धिकालेवह्नि
व्याप्यधूमवान्पर्वतोवह्निमानित्यनुमित्युत्पत्तेस्तत्रव्यभिचारेणास्तुपर्वतत्वावछिन्नोद्देश्यकवह्निविधेयकानुमितित्व
स्यैवतत्कार्यतावछेदकत्वंतन्मतेआलोकलिंगकेछाकालेपर्वतोवह्निमानितिसिद्धिदशायांआलोकलिंगकप

मर्शाजन्यानुमितौ व्यभिचारस्य विना धूमलिंगके वह्निविशिष्टमित्यभावकार्यतावच्छेदककोटौ अव्यवहितोत्तरत्वादिसंबंधेन
धूमपरामर्शवैशिष्ट्यनिवेशनं चावश्यमनुमपकत्वादिति कल्पनालाघवावकाश इति चेन्न। तथापि धूमलिंगके वह्निविशिष्टव
ह्निव्याप्यधूमवान् पर्वतो वह्निमानिति मिथ्याभावकार्यतावच्छेदककोटौ धूमपरामर्शाव्यवहितोत्तरत्वनिवेशनप्रयुक्तलाघ
वस्यास्तु गौरवात्। आचार्यमतेन तादृशमिथ्याभावस्य वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्यनुमितित्वावच्छिन्नं प्रति हेतुत्व
कल्पनेनैवानुपपत्त्यभावादित्याहुः न दृतीयमतं॥ वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्यादिमिथ्याभावस्य कार्यतावच्छेदकं स्वा
व्यवहितोत्तरत्वादिसंबंधेन सिद्धिविशिष्टं यत्तद्भिन्नज्ञानत्वं॥ तथा सति वह्निमदनुमितिं प्रति विशिष्टवैशिष्ट्यबोधात्मकप्र
त्यक्षप्रत्यक्षेच्छाविशिष्टवह्निमत्पर्वतवान् देश इत्यादिविशिष्टवैशिष्ट्यप्रत्यक्षसामग्र्या अनुमित्यभावविशिष्टायाः प्रतिब
कत्वे कल्पनीये तत्र तत्तदवच्छेदककोटौ विशेषणतावच्छेदकप्रकारकनिर्णयात्मकपर्वतो वह्निमानिति मितिनिर्णयानि
वेशे लाघवसंभवात्॥ तत्र तथाविधनिर्णयाघटिततादृशसामग्र्यभावविशिष्टं प्रति तथाविधनिर्णयाघटिततादृशसामग्र

ग्यभावस्य हेतुत्वकल्पनेनैव व्यभिचारवारणासंभवात् । आपत्तिवारणं तु यद्दर्शितकार्यकारणभावबलादिति ॥ नच त
थाप्यनुमित्साकाले सिद्धिदशायां यादृशसामग्रीबलादनुमितिस्तत्रानादृशसामग्रीबलादनुमित्साशून्यकालेप्यनुमि
त्यापत्तिरिति वाच्यं ॥ अनुमित्साविशिष्टं प्रति अनुमित्साया अपि हेतुत्वकल्पनात् ॥ अनुमित्सारूपकारणविरहादेव त
त्रापत्त्यभावात् ॥ नच तथापि धूमलिंगिकेच्छायाः कार्यतावच्छेदककोटौ धूमलिंगकेच्छावैशिष्ट्यनिवेशे चिंतामणिका
रमते गौरवं ॥ आचार्यमते तु वह्निव्याप्यधूमप्रकारकपर्वतोद्देश्यकवह्निविधेयकानुमितित्वस्य तस्याः कार्यतावच्छेदकत्वे
लाघवमिति वाच्यं ॥ तादृशधर्मस्य धूमलिंगकेच्छायाः कार्यतावच्छेदकत्वे तुल्ययुक्त्या वह्निव्याप्यधूमवत्पर्वतत्वावच्छिन्नवि
शेष्यकवह्निव्याप्यधूमप्रकारकपरामर्शजन्यानुमितिर्जायतामितीच्छाया अपि कार्यतावच्छेदकत्वमंगीकार्यं ॥ तथा च तयोः
परस्परं व्यभिचारः इत्यव्यवहितोत्तरत्वादिसंबंधेन तत्तदिच्छावैशिष्ट्यं तत्तदिच्छाकार्यतावच्छेदककोटाववश्यं निवेशनी
ये इति तन्मतेऽलाघवावकाशः ॥ न च तथाविधानेककार्यकारणभावकल्पनापेक्षया उत्तेजकत्वकल्पनमेव सम्यगिति

वाच्यंतथासत्यप्रामाण्यग्रहानाभावेनइच्छाभावानांविशेष्यविशेषणभावविनिगमनाविरहेणकार्यकारणभावानंत्यादवच्छेद
कगोचरप्रसंगाच्चतदपेक्षयाअनुमित्सायाहेतुत्वकल्पनस्यैवसमीचीनत्वादिति।भवतुवाअनुमित्सायाःसिद्धिप्रतिबंधकानभिमति
प्रतिसीयवह्निव्याप्तिप्रकारकज्ञाननिरूपितविशेष्यतावच्छेदकीभूतधर्मलिंगकत्वप्रकारकत्वस्वसामानाधिकरण्योभयसंबं
धेनव्याप्यवत्तानिर्णयविशिष्टायावह्निप्रकारकत्वप्रकारकानुमितिविषयिणीच्छाविरहविशिष्टपर्वतविशेष्यवह्निप्रका
रकनिर्णयाभावत्वेनहेतुत्वंकल्प्यमितिलाघवात्।ननुतत्तल्लिंगभेदेनानुमितिसिषाधयिषयोःकार्यकारणभावोपिगौरवात्
।तथाचवह्निव्याप्यधूमवान्पर्वतोवह्निव्याप्यआलोकवांश्चेतिसमूहालंबनपरामर्शकालेआलोकलिंगकपर्वतोवह्नि
श्यपकवह्निविधेयकानुमितिर्जायतामितीच्छासत्त्वेपर्वतोवह्निमानितिसिद्धिकालीनानुमितेःधूमेमप्यपरामर्शितसिध्यमा
वह्निप्रकारणसत्त्वेनतथाविधसिध्यभावस्यहेतुतायांव्यभिचाराभावेनतत्कार्यतावच्छेदककोटावव्यवहितोत्तरत्वादि
संबंधेनसिध्यभाववैशिष्ट्यनिवेशप्रयोजनाभावेनतत्कार्यतावच्छेदककोटावव्यवहितोत्तरत्वादिसंबंधेनसिध्यभाववै

शिष्टपर्वते निवेशप्रयोजनाभावेन चिंतामणिकारमतेपि गौरवानवकाशः। उक्ताचार्यमते अनुमितौ साध्यव्याप्तिविशिष्टहेतु
मानं निर्युक्तिकमेवालोचयामः। अथाचार्यमते वह्निव्याप्यधूमवान् पर्वत इत्यादिपरामर्शाद् वह्निव्याप्यधूमवान् पर्वतो व
ह्निमानित्यनुमितिस्वीकारे धूमाभाववान् वह्न्यभाववानित्यादिनिर्णयविशिष्टधूमाभाववान् पर्वत इत्यादिनिर्णयत्वरूप
गुरुधर्मावच्छिन्नस्यावच्छेदकधर्मदर्शनविधयास्वातंत्र्येण प्रतिबंधकताकल्पनेलाघवात्। आचार्यमते तथाविधावच्छे
दकधर्मदर्शनकाले पर्वतावच्छेदकधूमाभावप्रकारकबाधनिर्णयरूपप्रतिबंधकस्यावश्यकत्वेन न तद्बलादेव तदा
नीमनुमित्यनुत्पत्तिनिर्वाहात्। एवमाचार्यमते घटादिप्रत्यक्षं प्रति तथाविधगुरुधर्मावच्छिन्नाभावाघटितं वह्निविधेय
तानिर्णयत्वाभिमतिं प्रति सामग्र्याः प्रतिबंधकत्वकल्पनेनापि लाघवसंभवः। तन्मते तत्र धूमाभाववान् पर्वत इत्यादिबाधनि
र्णयाभावघटितानुमितिसामग्र्याः प्रतिबंधकत्वकल्पनेनैव निर्वाहात्। एतेन धूमाभाववान् पर्वत इति बाधनिर्णयकाले
आचार्यमते अनुमित्यपलापप्रसंग इत्यपि निरस्तं॥ तथाविधानुमितिस्वीकारे उपदर्शितलाघवस्याक्षुण्णतया उपदर्शित

वाधकालेऽनुमित्युत्पादस्यानापत्तेः। न चाचार्यमते घटाभाववान्धूमाभाववान्वह्न्यादिनिर्णयविशिष्टघटाभाववान्पर्वत इ
त्यादिनिर्णयरूपावच्छेदकधर्मदर्शनाभावघटितवह्न्यनुमितिसामग्र्या घटादिप्रत्यक्षप्रतिबंधकत्वकल्पने गौरवमिति वाच्यं। तथावि
धसामग्रीप्रतिबंधकतावच्छेदककोटौ नाहार्यत्वावच्छेदकधर्मदर्शनाभावनिवेशो धूमाभाववान्घटाभाववान्वह्न्यभाववानित्या
दिनिर्णयविशिष्टघटाभाववान्पर्वतो धूमाभाववानित्यादिनिर्णयाभावनिवेशेन लाघवसंभवात्। तन्मते तदा घटाभाववावच्छि
न्नविशेष्यतानिरूपितधूमाभावप्रकारताशालिनिर्णयविशिष्टघटाभावप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशा
लिनिर्णयस्यावश्यकत्वेन एतादृशावच्छेदकधर्मदर्शनाभावघटितानुमितिसामग्र्यभावस्योपदर्शितावच्छेदकधर्मदर्शन
कालीनानुमितिसामग्रीदशायामावश्यकतया तदा घटादिप्रत्यक्षोत्पत्तौ बाधकाभावादिति। न च तथापि घटादिनप्रत्यक्षं प्रति
धूमवान्वह्न्यभाववानित्यादिबाधाभावनिवेशपूर्वकानुमितिसामग्र्याः प्रतिबंधकत्वकल्पनेनाचार्यमते गौरवं चिंतामणिकारम
तेन दाह्यनुमित्युत्पत्तौ बाधकाभावेन घटादिप्रत्यक्षानुत्पत्त्यादिव्यभिचाराभावात् अनुमितिसामग्रीप्रतिबंधकतावच्छेदककोटौ न

ष्याविषयबाधाभावानिवेशनप्रयुक्तलाघवमस्त्विति वाच्यं। आचार्यमते धूमवान्वह्न्यभाववान्घटवानित्यादिभ्रमस
सं प्रति धूमपरामर्शजन्यवह्न्यनुमितिसामग्र्याः प्रतिबंधकत्वाकल्पनप्रयुक्तलाघवसंभवेनोपदर्शितगौरवस्यादोषत्वात्॥
तथाविधलाघवं च तत्कालीनावश्यविद्यमानविशेष्यतावच्छेदकप्रकारकनिर्णयात्मकधूमावच्छिन्नविशेष्यतानिरूपि
तवह्न्यभावनिष्ठप्रकारताशालिनिर्णयस्य तथाविधानुमितिं प्रति प्रतिबंधकीभूतबाधबुद्ध्यात्मकतया नाहार्याप्रतिबंधक
मत्वेन तदानीमनुमितेरनुसमाता तादृशाग्रससोसन्निर्णीरिति चेन्नैवं। उपदर्शितधवत्वेन चिंतामणिकारमतेपि वह्निविधेय
कानुमितिप्रधूमाभाववानपर्वत इत्यादिनिर्णयस्य मणिमंत्रादिन्यायेन प्रतिबंधकत्वकल्पनेनैव सर्वे सामंजस्ये अनुमि
तौ साध्यसाध्यभावत्वभानस्य निर्युक्तिकत्वात्। अथ बाधूमाभावावच्छिन्नविशेष्यतानिरूपितवह्न्यभावनिष्ठप्रकारताशा
लिनिर्णयविशिष्टधूमाभावप्रकारतानिरूपितपर्वतत्वावच्छिन्नविशेष्यताशालिनिर्णयाभावरूप। वच्छेदकधर्मदर्शी
नभावघटिततथाविधानुमितिसामग्रीविशिष्टान्यत्वावच्छिन्नं प्रति तथाविधावच्छेदकधर्मदर्शनाभावाघटितत्वादृशा

वा॰र्थ॰
३०

मितिसामग्र्याः प्रतिबंधकत्वं कल्प्यते तथाविधावच्छेदकधर्मे देशं न काले यादृशसामग्रीबलात् घटादिप्रत्यक्षं जातं तेन रूपेण कालेपि
वह्न्यनुमितिसामग्रीकाले तादृशसामग्रीबलात् घटादिप्रत्यक्षापत्तिवारणाय तथाविधावच्छेदकधर्मदर्शनविशिष्टत्वावच्छिन्नं प्र
ति तथाविधावच्छेदकधर्मदर्शनस्य हेतुत्वं कल्प्यते। न चैवं तादृशकार्यकारणभावकल्पने गौरवमिति वाच्यं। तत्कल्पने घटादि
प्रत्यक्षं प्रति वह्निमत्पर्वतबोधकालत्वसादिजन्यवह्निमत्पर्वतेनोघटवानिति शाब्दबोधसामग्रीप्रतिबंधकत्वकल्पनीयेन तदवच्छे
दककोटौ तादृशावच्छेदकधर्मदर्शनाभावस्यानिवेशेन लाघवसंभवात्। तादृशावच्छेदकधर्मदर्शनाभावाघटितत्वेन उप
स्थितशाब्दबोधसामग्रीविशिष्टान्यत्वावच्छिन्नं प्रति तथाविधावच्छेदकधर्मदर्शनाभावाघटिततादृशसामग्र्याः प्रतिबंधक
त्वकल्पनेनैव निर्वाहादिति। उपदर्शितस्थले च सर्वत्र कार्यतावच्छेदककोटौ सामग्र्यादिवैशिष्ट्यमव्यवहितोत्तरत्वादिसंबंधे
न वाच्यं तथाविधसामग्र्यभावकार्यतावच्छेदककोटौ तथाविधसामग्रीविशिष्टान्यत्वनिवेशात् गौरवं च नाशंकनीयं। घटादि
प्रत्यक्षं प्रति तथाविधसामग्र्या अनंतप्रतिबंधकत्वाकल्पनेन लाघवसंभवादित्यनुमितिप्रतिबंधविचारः। रामरुद्रीनिश्रीहीरारामकृतोर्कि

राम॰
३०

गोपहितलैंगिकविचारः समाप्तः॥ श्री राम संवत् १८ ९७ ४४ राम राम ॥४४४४